॥ ६० ॥ [illegible] ॥ आरब्धीप्सितग्रंथस्य [illegible] यथाशास्त्रं [illegible] यथारंभे अभिमतदेवतानमस्क्रियते। इति सिद्धमनुमानं अतः प्रकरणं चिकीर्षुः शिवादित्याचार्यः चिकीर्षितस्य प्रकरणस्या
विघ्ननिरासमाप्तिप्रचयपरिपंथकत्वमवनिरासस्याभिमतवाद्यपरिपालनाय विशिष्टदेवतालक्षणं मंगलमाचरन् विषयादिसम्यक्प्रदर्शयति हेतवे इत्यादिना शंभवे नमः इत्यस्यार्थः शंभवे नमः शं
सुखं भवति अस्मात् स शंभुः। तस्मै शंभवे। शंभवे नमः कृते स्त्रगादेः कस्यचित् किंचित्सुखं भवति तस्मै नमस्कारः कृतः स्यात् तदनवस्थाय तदर्थं गुरवे आदिशब्देन न चैव गुरवे नमः न वर्तितं
नवगुरवे इत्युक्ते मातापित्रोरपि व्याप्तिः स्यात् तदर्थं प्रभवे विद्यानां प्रभवे तयोर्विद्यासु अभवात्। विद्यानां प्रभवे शंभवे गुरवे नमः इत्युक्ते आचार्यादीनां नमस्कारः कृतः स्यात् तदर्थं सर्वे-
ति सर्वपदं तेषां सर्वविद्यासु अभवात्। सर्वविद्यानां प्रभवे शंभवे गुरवे नमः इत्युक्ते [illegible] एवं वदति एवं विधस्येश्वरस्य सद्भावे किं प्रमाणं। अनुमानप्रमाणमाह। जगतां हेतवे जगन्निमित्तकार-
णाय। किं तदनुमानमित्याह क्षित्यादिकं पक्षः सकर्तृकमिति साध्यो धर्मः कस्मात्कार्यत्वात् यद्यत्कार्यं तत्तत्सर्वं सकर्तृकं दृष्टं यथा घटः कार्यं च भवति सकर्तृकमपि भवति तथा चेदं क्षित्यादिकं कार्यं तस्मा-
त्सकर्तृकमेव। अनेनानुमानेन कश्चित् कर्ता विशेषसिद्धितः परिशेषानुमानादीश्वरः सिद्धः कः परिशेषप्रमाणं [illegible] प्रसंगात् [illegible] शिष्यमाणे संप्रत्यये परिशेषः सर्वविद्यानां प्रभवे शंभवे गुरवे न-
मः इत्युक्ते वेदांतिनां मते हिरण्यगर्भस्य नमस्कारः कृतः स्यात् तदर्थं जगतामेव ग्रहणं। वेदांतिनां मते हिरण्यगर्भस्य जगत्कर्तृत्वं संभवति हिरण्यगर्भस्य जगत्कारणत्वे उपादानकारणत्वं सं-
भवति न तु निमित्तकारणत्वं ईश्वरो जगन्निर्माणे निमित्तकारणं भिन्न उपादानकारणं। उपादानकारणं तु परमाण्वादि अतः [illegible] हिरण्यगर्भस्य व्यावृत्तिः क्रियते [illegible]

॥ हेतवे जगतामेव। संसारार्णवसेतवे प्रभवे सर्वविद्यानां। शंभवे गुरवे नमः। १॥ प्रमितिविषयाः पदार्थाः ते च द्रव्यगुणकर्म-
सामान्यविशेषसमवायाभावाख्याः। सप्तैव। तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव। गुणाश्च
रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्ने-
हसंस्कारधर्माधर्मशब्दाश्चतुर्विंशतिरेव। २४॥ कर्माणि उत्क्षेपणापक्षेपणाकुंचनप्रसारणगमनानि॥ ५॥

मरोपि [illegible]। ईश्वरनमस्कारे किं प्रयोजनं। अत प्रयोजनमाह संसारार्णवसेतवे इति संसार एव अर्णवः संसारार्णवः तस्य सेतुरिव सेतुः संसारार्णवसेतुः तस्मै। [illegible] संबंधचतुष्टयस्य निरूपणं
क्रियते। अतो जगतां हेतवे। संसारार्णवसेतवे इत्युक्तं [illegible] विषयः प्रयोजनं च दर्शितः। विषयप्रयोजनानुबंधे [illegible] अधिकारी च लभ्यते अस्मिन् शास्त्रे को विषयः। किं प्र-
योजनं कः संबंधः कोऽधिकारी। ईश्वरो महाविषयः पदार्थज्ञानं तत् विषयः संसारतरणं महाप्रयोजनं पदार्थपरिज्ञानमवांतरप्रयोजनं विषयविषयिभावसंबंधः संसारतरणकाम-
पदार्थपरिज्ञानकामो वा अधिकारी। यदर्थं मंगलाचरणं कृतं तन्नेदं दृश्यते। २। प्रमितिविषयाः पदार्थाः अथ प्रकारांतरेण संबंधमाह। हेतवे जगतामेव इत्युक्ते ततो जगतः पदार्थात्मकत्वा-
त् साकांक्ष। जगत्परिज्ञानादीश्वरज्ञानं भवति। अतो जगत्परिज्ञानाय लक्षणमाह। प्रमीतिः प्रमतिः सत्यज्ञानं तस्या विषयाः प्रमेयाः। प्रमितिविषयाः पदार्था इत्युक्ते सामान्यकथनमन्यथा
ह। तदर्थं प्रमितिविषयाः पदार्थाः। एवमपि [illegible] प्रमितिविषयाः इति। अस्मिन् शास्त्रे [illegible] विषयसंगतिर्वर्ण्यते सामान्येन विनाभावलक्षणं च
[illegible] विनाशमाह। तत्र तिष्ठति द्रव्याणि गुणाश्च कर्माणि च सामान्यं विशेषाश्च समवायश्च अभावश्चेति [illegible] संयोग [illegible] एव ग्रहणं। तत्र सप्तसु पदार्थे-
षु द्रव्यपदार्थस्य विभागमाह। द्रव्याणीति। गुणपदार्थविभागमाह। गुणा इति। ननु [illegible] गुणेषु संख्या [illegible] यदा गुणादीनां पंचानां वि-
गुणत्वे निष्क्रियत्वे [illegible] इति [illegible] पदार्थविरोधः आपद्यते इत्याशंक्याह रमाह ॥

१८४३५

२

यथा च गुणेषु संख्या नास्ति तथापि द्रव्यवृत्तिसंख्या गुणेषु संख्या उपचर्यते इति अथवा चतुर्विंशत्याकारबुद्धिविषयत्वात् चतुर्विंशतिरित्युच्यते। सामान्यमिति परं सत्ता अधिकवृ-
त्तित्वात्। द्रव्यगुणकर्मसु वर्तते। अपरं घटत्वं न्यूनवृत्तित्वात् घटव्यक्तिषु वर्तते। नान्यत्र परापरं द्रव्यत्वं व्याप्यव्यापक रूपत्वात् सत्तापेक्षया अपरं द्रव्येष्वेव वर्तते। न गुणकर्मणोः
घटत्वापेक्षया परं। द्रव्यत्वं परं अपरं घटत्वं। परापरं पृथ्वीत्वं। इदानीं [illegible] द्रव्यपदार्थस्य क्रमेण अवांतरविभागमाह ॥ ११ ॥ ननु शरीरेन्द्रियविषयाणां [illegible]

॥ सामान्यं परमपरं च परापरं चेति ७ विशेषास्तु यावन्नित्यद्रव्यवृत्तित्वादनंता एव। समवायस्त्वेक एव। अभावस्तु प्रागभावप्रध्वंसाभावात्यंताभा-
वान्योन्याभावभेदाच्चतुर्विधः १० पृथ्वी नित्या अनित्या च। परमाणुलक्षणा नित्या कार्यलक्षणा अनित्या शरीरेंद्रियविषयरूपा। शरीरमस्मदादीनां प्रत्यक्ष-
सिद्धं। इंद्रियं गंधव्यंजकं। विषयो घटादिः। आपोऽपि परमाणुलक्षणा कार्यलक्षणाश्च परमाणुरूपकार्यरूपा तापि शरीरेंद्रियविषयरूपा। शरीरं च
वरुणलोके। इंद्रियं रसव्यंजकं। विषयः समुद्रादिः। तेजोऽपि नित्यमनित्यं च परमाणुरूपं कार्यरूपं तदपि शरीरेंद्रियविषयरूपं शरीरमादित्यलोके
इंद्रियं रूपव्यंजकं। विषयो नानाविधो [illegible]। वायुरपि नित्योऽनित्यश्च परमाणुरूपः कार्यरूपः शरीरेंद्रियविषयप्राणलक्ष-
णः। शरीरं वायुलोके इंद्रियं स्पर्शव्यंजकं। विषयस्तु वृक्षादिकंपजनकः। प्राणस्तु शरीरांतर्वर्ती स एव क्रियाभेदादपानादिसंज्ञां लभ-
ते। स च क्षितिवायुपरमाणुसमूहरूप एव [illegible]। आकाशस्तु घटाकाशादिभेदभिन्नोऽनंत एव। कालस्तूत्पत्तिस्थितिविनाशल-
क्षणस्त्रिविधः। दिगैंद्री आग्नेयी याम्या नैरृती वारुणी वायव्या कौबेरी ऐशानी नागी ब्राह्मी रौद्रीत्येकादशविधा। आकाशादित्रयं वस्तु-
त एकैकमेवोपाधिभेदान्नानात्वं। आत्मा तु परमात्मा क्षेत्रज्ञश्चेति द्विविधः परमात्मा ईश्वर एक एव क्षेत्रज्ञाः अस्मदादयोऽनंता एव
मनांसि तु प्रत्यात्मनियतत्वादनंतान्येव। आकाशादिपंचकं नित्यमेव अपराणि अनित्यानि। रूपं शुक्लनीलपीतरक्तहरितकपि-
शचित्रभेदात् सप्तविधः। ४

गाद्विविधः कर्म
जः संयोगजः ३०
विभागोद्विविधः।
४

हृदि प्राणो गु[illegible]
पानः समाना[illegible]
त्तिसं[illegible]
दनः कंठ[illegible]
व्यानः सर्वसंचा-
रकः।

[illegible] परमाणुनिरूपणं [illegible] अनपेक्षत्वं ॥ १६ ॥ क्षेत्रे शरीरे जानातीति क्षेत्रज्ञः ॥ २० ॥ आत्मानम-
मानं प्रतिनियतस्य तत्र आत्मनि [illegible] तस्मात् ॥ २१ ॥ आकाशादिपंचके [illegible] समानो धर्मः अपरं पृथ्व्यादिचतुष्टयं ॥ २२ ॥ संयोगो द्विविधः कर्मजः संयो-
गजश्च। कर्मजोऽपि द्विविधः अन्यतरकर्मजः उभयकर्मजश्चेति [illegible] अन्यतरकर्मजः [illegible] उभयकर्मजः [illegible] एवं विभागो द्विविधः ॥ २३ ॥ त-
स्मात् मधुरतिक्तकटुकषायाम्ललवणभेदात् षड्विधः। गंधो द्विविधः सुरभिरसुरभिश्च २५ स्पर्शस्त्रिधा शीतोष्णानुष्णाशीतभेदात् त्रि-
विधः २६। संख्या एकत्वद्वित्वबहुत्वभेदात् त्रिविधा २७ परमाणुअणुमहद्दीर्घह्रस्वभेदाच्चतुर्विधं २८। पृथक्त्वमेकानेकवृत्ति २९। संयोगः

॥क्रमप्राप्तांप्रमांविहाय अप्रमायांशेषंविभागमाह।यत्र अयथार्थिकमाह न्यायः ५६। घटत्वंसंसर्गकारं प्रति बुद्धिद्वियात्मिष्टमनः।समनुमीश्वरत्वत्पक्षामिति ईश्वरो द्वियंनास्ति इंद्रियंवि
नासान्द्यात्यस्यति।अतःसप्तमं।३७ तदपिलिंगमपिपरोक्षं धृतेयेनतत्परार्थं उक्तयागानिस्वार्थपरार्थं द्या ४० लिंगलक्षणरहितालिंगवदेसास मानालिंगाभासा ४१। नूनुतर्कक्षुसोकंबंध
घत्तनोक्तातत्राह: तर्कस्पशंशाये स्वप्नस्य विपर्यये इति यथाक्रमेणांतर्भावः। ४२ तत्रातेस विकल्पकनिर्विकल्पकेद्वे ज्ञाने अप्रमायामंतर्भवतः। अन्यात्रेस विकल्पकनिर्विकल्पके ज्ञाने प्रमा
यामंतर्भवतः ४३। एवमितिसविकल्पकनिर्विकल्पकवत्। उत्पत्तिज्ञानोपादानोपेक्षाज्ञानानां यथाक्रमेणांतर्भावः यथा। क्रमंदर्शयति सोयमितियत्र। तोत्पत्तिज्ञानं अप्रमायामंत
र्भवति समवतित्वात्तत्रं सोयमितियत्र ज्ञातासाप्रमायामंतर्भवति सुकीयं सुवर्णदिस्नेहीआ कथयतिनमःदीयमेतत्। परकीयज्ञात अदेय देयबुद्धिर्जाता सा अप्रमायामंतर्भवति स्वी
यसुवर्णेःस्वीयबुद्धिर्भवति आसा अहेय बुद्धिप्रमायामंतर्भवति सर्पकं कलेवतीतिः अनुपादेयउपादेयबुद्धिर्जाता अप्रमायामं० कं कलेकं कलप्रतीति उपादेयउपादेयबुद्धि साप्रमाया
मंतरर्भवति। अन्यपुत्रं स्वपुत्रवेत्ति इत्यालिमितिइति उपेक्षणीये अनुपेक्षाबुद्धिः॥

॥कर्मद्विविभागकृत्वः परत्वं कालकृतं दिक्कृतं च ३१। अपरत्वमपि द्वि। कृतं कालकृतं च। बुद्धिरपि स्मृतिरनुभवश्चः अनुभवोपि प्रमा अप्रमा च ३५ अप्रमापि द्विः संशयवि
पर्ययश्च। प्रमा उत्पन्नं मनुमितिरिव उत्पन्नं संस्कारं षडिंद्रियाणि ईश्वरश्च ति सम ३७ अनुमितिरपि त्रिविध लिंगस्यैविध्यात् अन्वयव्यतिरेकी केवलान्वयी
केवलव्यतिरेकी चेति। तदपि स्वार्थं परार्थं परार्थं गानि प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि। उत्तरयागानि पक्षधर्मत्वं सपक्षेसत्वं विपक्षाद्व्यावृत्तिरबाधि
तविषयत्वं असत्प्रतिपक्षत्वं चेति ४० तदाभासा असिद्धविरुद्धानैकान्तिकानध्यवसितकालात्ययापदिष्टप्रकरणसमाः ४१ तर्कस्वप्नौ संशयविपर्य
यावेव ४२ सविकल्पकनिर्विकल्पकावुभे प्रमाप्रमायां वा तत्र भावः ४३ एवं प्रत्यभिज्ञाहानोपादानोपेक्षाज्ञानानामपि ४४ उहानध्यवसायौ य
संशय एव। सुखं असंसारिकं स्वर्गश्च दुःखमपि दुःखकारणमात्रं च ४५ इच्छापि साध्यविषया साधनविषया च ४६ द्वेषोपि साध्यविषयसाधनविषयश्च
यत्नोपि विहितोप्रतिषिद्धोदासीनविषयः गुरुत्वं समाहारस्य मकायव्यवच्छिष्टं द्रवत्वं सांसिद्धिकं नैमित्तिकं च स्नेहस्वाभाविक औपाधिकश्च संस्का
रो वेगो भावना स्थितिस्थापकश्च। धर्मः प्रवृत्तिको निवृत्तिकश्च ५५॥

ज्ञीत ज्ञाद अप्रमायांस्वपुत्रं परपुत्रेम आनालिंगति अनुपेक्षणीये उपेक्षाबुद्धि ज्ञात ज्ञाद प्रमाया॥ उपेक्षणीये उपेक्षाबुद्धिः प्रमायां यथापि गत्वतृणदर्शनेन तु संशयविपर्यय उहानध्यवसायरूप
अप्रमायत्वं विभक्षकं नोक्तं तत्राह। ४४ उदेति ४५ ४६ दुःखकारणप्रत्यर्थं दुःखमित्यकेईश्वरेआजन्यपटेतिव्याप्ति स्वाप्तत्प्रकृतं मात्रपदं ईश्वरेअपि दुःखकारणं नवति ईश्वरे घटस्यापि कारणं पुनरधर्मोऽ
तस्येत्कारणं अतो मात्रपदं। कंटकादिदुःखकारणपरित्वात् दुःखमनंतेएवं सुखकारणे आत्मसुखमप्यनंते कारणं नाम नंतः ज्ञात स्वाध्यमिष्टाफले नो जनादि साधनं सोऽनुपकरणं साध्यफलं। सुखं
द्वियाक्षु सुखसाधनविषया। ४७ द्वेषसाध्यविद्विषया साध्यविषयः दुःखसाधनविषयश्च। ४८ गंगागमनेष्वयत्नो विहितः वेश्यागमने निषिद्धः। स्वगृहे गमने विहिताविहितेति किं किं उदासीनः
र्धः कणादी दलकेसमाहाररूपं पाषाणिः एकावयवनिष्टं ५१ अप्सु द्रवत्वं सांसिद्धिकं घृतते लादिषु नैमित्तिकं कारणं ५२ द्रवत्वेसित्वोपि ५३ ५४ अग्निहोत्रादिषु धर्मः प्रवृत्तिक फ वत:२
लावश्यानोऽदुःखावज्ञानेनमस्कारादिः धायवित्रादिनाशः पद्मनदोषोषादाववर्णात्मकः।५७॥ ×ज्ञाद्वेर्णात्मको अवर्णात्मकश्च ५७॥×
×अधर्मफलावज्ञानेनमस्कारादिनाशश्च ५६।×

॥अत्र गुणेषु पार्थिवपरमाणुरूपात्मांशपाकसंयोगात्नस्यतिःपतेजःसत्वावदी परमाणुः स्वरूपज्ञात्री। नतस्यंतीतिगंधग्रहणं ५७ अन्येरूपरसगंधस्पर्शसंख्यापरिमाणपृथक्के ,स्नेहाभितानि बुद्धिःइच्छाप्रयत्नसुख
स्वरूपाः ५८ अन्याप्यकास्वाश्रयव्यापकाः यथाविधर्माधर्मसिक्विस्त तथाविधस्वरूपज्ञात्वात्प्रदेहे एवानुमीयते। अत्र संस्कारोभावनाख्यः ६० बुद्ध्यादि व्याप्यव्यापकश्चेति उत्तयरूपा ६१ अन्येस्वरूपग च३१
धस्पर्शसंख्यापरिमाण ६२ पृथक्परत्वपरत्वा द्रवत्वभेद स्थितिस्थापकत्वाः स्वाश्रयव्यापका। ६३ अवजेन इन्द्रियेण विहितांउर्ध्वक्षुस्वयाणां शब्द स्तनिषिद्धा इत्यनर्थकमहंद इतिनिषेधवनाते अ
तत्प्रत्यपितिष्ठकृतणकाष्ठदहनस्वदाक्षीनि। ६२ पचनक्रियाउपाधिः आवत्पवतिस्यावत्याचकत्वं। गोत्वादिव तत्सर्वदाइवग्नेपवं तान्नावे के पतियोनित! यथामानत्वाबत्यतानावानतः स्वपुप
नास्तिकाराहंगोनास्तिइति अत्यंताभावे स्वपुष्प वंध्यासुतौ। ७ अत्र मृगाद्यो निरूपकाः। ६ प्रश्रदपरमिदमपर इदं मध्यं इतिपरापर व्यवहारात् तदुपलक्ष्य परापरत्व उक्तो। एवं मध्यत्यव हारान्मध्या
पलक्ष्य मध्यत्वं गुणः। कस्मान्नोक्तः तत्राह मध्यत्वमिति इदानहि इदंतम इति त्वाप्रतीत्यादृशाद्व्यालिकिं नोक्तानि। इतितत्राह अंधकार इति आलोकाभावस्य महत्फल्कं ज्ञात ६७ अनाकरापदार्थं त
अस्पा शक्तिकार्यमिमेयामन्यंते तत्राह शक्तिरिति विशेषणं विशेष्यं च ६२ तयोः संबंधः स्वस्पोनिसत्वे इदं कीदृशक्तुवर्डर्मन्यंते उत्ताकरास्तत्राह विशेषणं विशेष्यं तत्संबंधा एव एतच्यं विशिष्ट

॥अत्र गंधसंयोगविभागपरत्वापरत्व सुखदुःखद्वेषसंस्कारधर्माधर्माः त्वाष्टा अनित्यैकरूपाः ५८ अन्ये नित्यानित्यरूपा ५९ संयोगविभागसुखदुःखद्वेषसंस्कार
धर्माधर्मत्वाष्टा अव्यापका एवः ६० बुद्धीत्वाप्रयत्नाउत्तयरूपाः ६१ अन्ये स्वाश्रयव्यापकाः ६२ उक्तेपणादयो विहितप्रतिषिद्धोदासीनरूपाः ६३ सामान्यं जातिरूपं
उपाधिरूपं वा। जातिः सत्ताद्रव्यत्वगुणत्वकर्मत्वादि। उपाधिरूपं पाचकत्वं ६४ प्रागभावादय इति योगिनः सादनंता एवः। ६५ मध्यत्वपरत्वापरत्वाभावः ६६ अंधकारोप्य
भाव एवः। शक्तिस्वरूपमेवः ६७ विशिष्टमपि विशेषणविशेष्यसंबंधः ६८ अज्ञातताज्ञानसंबंध एवः सादृश्यमुपाधिरूपं सामान्यं ७० लघुत्वगुरुत्वाभावः एवमन्यस्या
पिपदार्थस्य मतोत्रैवांतर्भावः यथा संख्यायां एव गुणो ७१ एते पुमस्य नित्यानां कारणत्वमेव अनित्यानां कारणं कार्यं चेः ७४ तत्र कारणं समवायिकारणं अस
मवायकारणं निमित्तकारणं त्रिविधं चेति अपरे सेदास्वयमूहनीयाः ७५ एतेषां तत्त्वज्ञानं निःश्रेयसहेतुः तत्त्वं मनारोपितरूपं तस्य ज्ञानमनुभवः स च श्र
वणमनननिदिध्यासनसाक्षात्कारलक्षणचतुर्विधः ७६ निःश्रेयसं पुनः स्वबज्ञानोत्पाद्यः मिथ्याज्ञानकारणध्वंसः समानाधिकरणतत्कार्यसमस्तदुः
खाभावः।७७॥इः खण्डः।

नत्वर्थसंबंधः संयोगादिः विशेषणविशेष्यं च द्रव्यगुणादिरिति नवरपदार्थस्यातिविशिष्टं पृथक्। मीमांसका ज्ञानंज्ञेय तत्संबंधेस्योज्ञाततनाक्षात्कारं पृथक्मन्यते। तत्राह ज्ञाततेति ७० तू योऽत्वयस्य साम्य
मुपाधिः। ब्राह्मणत्वकत्वस्य पवक्रियासंबंधः उपाधितथा साहस्येन गोगवयवसामान्यमुपाधिः। अतो न सादृश्यं पृथक्। पदार्थं उपाधिरूपसामान्यं तर्भवति। ७१ न तु अद्यादं जयुतयो इदं गुरुः इदमपलितवा
न्नघुत्वंकर्वं नगुणः। तत्राह लघुत्वमिति एवमपिपदार्थोनावरूपः पदस्वत्वांतर्भवति। अन्यरूपपदार्थान्यमं स्यापकसुपदार्थेषु वर्तमानत्वात्। ७४ पोयतिरिक्त समस्तपदार्थाः तेनमालावरूपासंख्यानावरूपेषु गुण
पुज्ञत्तर्भतिनियवात अव्यवनामरूपनावरूपपदार्थस्मानावरूपेषुगुणावांतर्भावः। नावरूपस्य तासो। तत्र कारणं कार्ययोर्नम्भिकारणं त्रिकं ७७ कार्यसमवेतामिति [illegible] समवायिकारणं पटइति [illegible]
संज्ञादप्रति। एवं समवायिकारणं किं विरुद्धं द्रव्यगुणहिमावर्णं इत्यादयो सेदाः स्वयमूहनीयाः। ७ एतार्थानां गुणोत्ततमाह। रूपयते दृश्यतेइति रूपं तत्वरूपमित्यर्थः केवलं सुखिरजतसम्मेलितिवा सि
तथा तत्त्वं सर्वसंरावितं ज्ञानारो। वितरूपमित्यक्के साक्षात्कं वचनमनर्थकस्यात्। किंतत्वं तदर्थतत्त्व मनारोपितं सुस्वरूपं ज्ञानहरा किंतात्पर्यविषयश्रवणं मननं विचारः तत्पुनितं ज्ञाने
मननं निदिध्यासनं तत्पुनिते ज्ञाने नदिध्यासनं। साक्षात्कारं प्रति मनं ज्ञानमनुभवः [illegible] नुनवः एतेषां तत्त्वज्ञानंतत्त्वज्ञाने निःश्रेयसहेतुरित्यत्रकेन निःश्रेयसः समतो निःश्रेयसमत
लक्षणमाह [illegible] मिथ्याज्ञानकारणः [illegible] समानाधिकरण ×

कारण तत्कार्यसमस्तदुः
खाभा॥७४॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

नावस्तुनिश्रेयसं। अत्र नावानिश्रेयसमित्यत्र कदाचिदाचात्वेऽतिव्याप्तिः स्वद्याप्तस्यैश्वपान्नानाबोनिःश्रेयसं एवमपि कंटकादिजाने दुःखानावेऽतिव्याप्तिस्तद्वारणाय समस्तदुःखानावो निःश्रेयस मिति तेषां न सर्वत्र स्यात् कुतः समस्तदुःखस्य कार्यस्य मिथ्याज्ञानलक्षणकारणे सति अभावो न घटते। विद्यमाने कारणे कार्यानिवृत्तेः तदर्थमुक्तं मिथ्याज्ञानकारणध्वंसपदं। एवमपि लक्षणसमन्वयति। यतो बोधमतेः क्षणिकत्वात् क्षणिकत्वेऽपि मिथ्यात्वात्मनो मिथ्याज्ञानकारणध्वंसः अन्यस्यात्मनो दुःखानावः। अन्यस्य द्वितीयस्य मोक्षः। तदर्थं समानाधिकरणपदं। मिथ्या० इत्यत्र क्वचित् लक्षणेऽसंभवः यतो निर्मिता मिथ्याज्ञानकारणध्वंसो न संभवति तदर्थमुक्तं तत्वज्ञानेत्यादिपदं। यथा शुक्तिज्ञानानंतरं रजतज्ञानं न स्यादिति एवं तत्वज्ञानान्मिथ्याज्ञानं न स्यादिति एवमपि लक्षणमसंगतं स्यात्। यतः पटकारणे तंतुनाशे पटकार्यघटनासंभवात् पद्यते तदर्थं स्वसहकारिणेति पदं। मिथ्याज्ञानकारणेन स्वकार्यदुःखं कारणनाशात्कार्यनाश संभवति यथा तंतुनाशे पटनाशः दुःखनाशो भवति यद्रुक्तं तत्वज्ञानेनामिथ्याज्ञानं तेनाप्रसिद्धः [illegible] दुःखानावो यस्यानावो निःश्रेयसं कथ्यते। किंतु शरीरादिव्यतिरेको मिश्रितः सुखदुःखानावं च ततः प्रतिज्ञात्। षट् बुद्धय इति नामनाः ॥७७॥ लक्षणं सजातीयविजातीयव्यावृत्तिकोधर्मः। तत्र तज्ज्ञाने केवलव्यतिरेकी इति हेतुविशेषो लक्षणमित्यत्र अन्वयव्यतिरेकिणि धूमवत्त्वादिरूपेऽतिव्याप्तिस्तद्वारणाय केवलव्यतिरेकी। केवलव्यतिरेकी लक्षणमित्यत्र सर्वमनित्यं सत्त्वादिति अनध्यवसिते हेतावतिव्याप्ति तद्वारणाय [illegible] पक्षानावात् केवलव्यतिरेकिता पुनर्हेत्वानासत्वात्। हेतुविशेषो न भवति तदर्थमुक्तं हेतुविशेषः ॥७८॥ प्रयोगमाह लक्षणमितरेभ्यो भिद्यते लक्षणत्वात् इत्यत्र केनापि तेनाप्नितरेकसोन भवति। यथा पृथिवीलक्षणं गंधवत्त्वं ततश्च बाधः तदर्थमितरेभ्यः इत्युक्तं लक्षणे लक्षणानि इतरेभ्यः सर्वेभ्यो अलक्षणेभ्यो पदार्थेभ्यो भिद्यते इति साध्यो धर्मः कस्मात् केवलव्यतिरेकिहेतुविशेषवचनत्वात्। यदितरेभ्यो न भिद्यते तन्न केवलव्यतिरेकिहेतुः।

भि

रारषडिंद्रियाणि षड्विषयाः षट् बुद्धयः। सुखं दुःखं चेति एकविंशतिप्रकारं ॥७८॥ इदानीं लक्षणाधीनत्वात् वस्तुज्ञानस्य लक्षणमेवोच्यते। तत्र केवलव्यतिरेकी हेतुः। विशेषो लक्षणं ॥७९॥ प्रयोगस्तु लक्षणमितिरेभ्यो भिद्यते केवलव्यतिरेकिहेतुविशेषवचनात्। यदितरेभ्यो न भिद्यते। तत्केवलव्यतिरेकिहेतुविशेषवचनं न भवति यथा धूमवत्त्वं न चैवेदं केवलव्यतिरेकिहेतुविशेषवचनमपि न भवति तस्मादितरेभ्यो न भिद्यते। इति न किंतु भिद्यत एव एवं सर्वत्र लक्षणप्रयोगोऽवगंतव्यः ॥८०॥ तत्र पदार्थलक्षणं कृतमेव ॥८१॥ द्रव्यं तु द्रव्यत्वसामान्ययोगि। गुणवत्। समवायिकारणं चेति ॥८२॥

विशेषवचनमपि न भवति। यथा धूमवत्त्वं इतरेभ्यो न भिद्यते केवलव्यतिरेकी हेतुविशेषवचनं न भवति न चैवं यथा धूमवत्त्वं तादृशं लक्षणं केवलव्यतिरेकिहेतुविशेषवचनं न भवतीति नपरामर्शः इतरेभ्यो भिद्यते। कस्मात् इति विषयवाक्यात्। यत इतरेभ्यो न भिद्यते तत्र मिति विपक्षे न भवति यथा शुक्तिरजतसंसर्गरूपवा भवति तथा एते प्रमिति विषया न भवंतीति तस्मादितरेभ्यः पदार्थेभ्यो न भिद्यते इति न किंतु भिद्यत एव। द्रव्यं पक्षः इतरेभ्यो गुणादिभ्यो भिन्नं द्रव्यत्वजातियोगित्वात्। यत्र इतरेभ्यो न भिन्नं तन्न द्रव्यत्वजातियोगि न भवति यथा गुण तथा गुणवत्। इदं द्रव्यं द्रव्यत्वजातियोगि न भवतीति नः। तस्मात् द्रव्यत्वजातियोगित्वात्। इतरेभ्यो न भिद्यते इति नः अपि तु भिद्यत एव। क्रमप्राप्तस्य द्रव्यपदार्थस्य लक्षणमाह ॥८२॥ सामान्ययोगि द्रव्यमित्युक्ते गुणकर्मणोरतिव्याप्तिः तद्वारणाय द्रव्यत्वसामान्ययोगि गुणवद्द्रव्यं समवायिकारणं चेति द्रव्यं कारणं। द्रव्यमित्युक्ते असमवायिकारणेषु रूपरसस्पर्शगंधसंयोगेषु गुणेषु असमवायिकारणेषु कर्मणि निमित्तकारणेषु गुणेषु च अतिव्याप्तिस्तदर्थमुक्तं समवायिकारणं। द्वितीयपक्षे समवायि द्रव्यमित्युक्ते गुणादिसामान्यादिष्वति समवायित्वं भवति समवायसंबंधेन गुणे गुणत्वादि सामान्यादेः समवेतत्वात्। तद्वारणाय कारणमिति पदं सामान्यादेर्नि समवायकुणादिः सामान्यादि प्रति कारणं न भवति समवायित्वे सति कारणं तद्द्रव्यमित्यर्थः। समवायित्वं इति स्वसमवेतकार्यमारंभकत्वं इत्यर्थः। इति द्रव्यलक्षणत्रयं ॥८३॥ जातियोगी गुण इत्युक्ते द्रव्यकर्मणोरतिव्याप्तिः॥

र

तद्वारणाय गुणवद्रहितो गुण इत्युक्ते गुणत्वेन च रहितं कर्मतत्रातिव्याप्तिः। तदर्थमुक्तं कारणपदं। कारणत्वरहितो गुण इत्युक्ते सामान्यादावतिव्याप्तिः तद्वारणाय जातिमत्वे सति जातिमान् गुण इत्युक्ते। कर्मणि अतिव्याप्तिः तद्वारणाय अचलनात्मक जातिमत्वे सति अचलनात्मको गुण इत्युक्ते द्रव्ये अतिव्याप्तिः तद्वारणाय समवायिकारणत्वरहितः ॥८३॥ आद्येति। कारणं कर्म इत्युक्ते द्रव्येऽतिव्याप्तिः तद्वारणाय असमवायिकारणं एवमपि रूपादावतिव्याप्तिः तद्वारणाय विभागपदं। तथापि आद्यविभागेऽतिव्याप्तिः संयोगासमवायिकारणं कर्मणि इत्युक्ते तद्वारणाय तदर्थं संयोगपदं संयोगासमवायिकारणं कर्म इत्युक्ते आद्यसंयोगेऽतिव्याप्तिः तद्वारणाय विभागासमवायिकारणं कर्म इत्युक्ते विभागेऽतिव्याप्तिः तद्वारणाय तदर्थं विभागेति पदं संयोगविभागासमवायिकारणं कर्मेत्युक्ते आद्यसंयोगाद्यविभागेऽतिव्याप्तिः तद्वारणाय आद्येति पदं ॥८४॥ सामान्यलक्षणमाह नित्यं सामान्यमित्युक्ते आत्मन्यतिव्याप्तिः तद्वारणाय एकं नित्यमिति। एकं नित्यमित्युक्ते आकाशेऽतिव्याप्तिः तद्वारणाय समवेतमिति पदं। एवमपि ईश्वरबुद्धौ अतिव्याप्तिः तद्वारणाय अनेकेति पदं। प्रकारांतरमाह समवेतसामान्यमित्युक्ते रूपादावतिव्याप्तिः तद्वारणाय अनेकेति पदं। अनेकसमवेतं अनेकसमवेतसामान्यमित्युक्ते विशेषेऽतिव्याप्तिः एकमिति पदं। एवमपि संयोगविभागे द्वित्वादिषु च अतिव्याप्तिः तद्वारणाय नित्यमिति पदं। सामान्यलक्षणमुक्त्वा विशेषलक्षणमाह ॥८५॥ एकव्यक्तिविशेष इत्युक्ते रूपादावतिव्याप्तिः तद्वारणाय सामान्यरहित इति सामान्यरहितो विशेष इत्युक्ते सामान्ये समवायेवातिव्याप्ति तद्वारणाय एकव्यक्तिवृत्तिरिति ॥८६॥ संबंधसमवाय इत्युक्ते संयोगेऽतिव्याप्तिः तद्वारणाय नित्य इति पदं नित्यसमवाय इत्युक्ते आकाशादावतिव्याप्तिः तद्वारणाय संबंध इति ॥८७॥ अथा

क

गुणत्वजातियोगी द्रव्यभिन्नत्वे चलनात्मकत्वे सति समवायिकारणरहितश्चेति ॥८३॥ कर्म कर्मत्वजातियोगि आद्यसंयोगविभागासमवायिकारणं चेति ॥८४॥ सामान्यं नित्यमेकमनेकसमवेतं ॥८५॥ विशेषस्तु सामान्यरहित एकव्यक्ति[illegible]वृत्तिः ॥८६॥ नित्यसंबंधः समवायः ॥८७॥ प्रतियोगिज्ञानाधीनज्ञानोऽभावः ॥८८॥ पृथिवीत्वसामान्यवती गंधवती पृथिवी ॥८९॥ अप्त्वजातिमत्यः शीतस्पर्शाः आपः ॥९०॥ तेजस्त्वजातियोगि उष्णस्पर्शं तेजः ॥९१॥ वायुत्वजातियोगी अरूपस्पर्शवान् वायुः ॥९२॥ शब्दगुणमाकाशं ॥९३॥ आदित्यपरिवर्तनोत्पाद्यपरत्वापरत्वासमवायिकारणोऽपरः परत्वापरत्वानधिकरणं कालः

वलक्षणमाह। प्रतियोगिज्ञानाधीनं ज्ञानं यस्य स तथा। एवं लक्षणो भावः। ज्ञानाधीनज्ञानाधीनज्ञानोऽभाव इत्युक्ते भ्रमज्ञानाधीने व्यक्तिज्ञानेऽतिव्याप्तिः तद्वारणाय प्रतियोगीति पदं। एवमपि इदमस्मादन्यं इदमनेन संयुक्तं इदमस्माद्विभक्तं इदमस्मात्परं इदमस्मादपरं इति भिन्नसंयोगविभागपरत्वापरत्वानि प्रतियोगिज्ञानाधीनज्ञानानि तेष्वतिव्याप्ति तद्वारणाय सामान्यवत्त्वे सतीति ज्ञातव्यं। अभावे सामान्यस्य वर्तनाभावात् सामान्यशून्यो अभाव इत्युक्ते सामान्यादिष्वतिव्याप्तिः तद्वारणाय प्रतियोगीत्यादि विशेषणं ॥८८॥ इदानीं पृथिवीलक्षयति सामान्यवती पृथिवी इत्युक्ते जलादिष्वतिव्याप्तिः तद्वारणाय पृथिवीत्वेति पदं गंधवती इत्यत्र न व्याप्तिः ॥८९॥ स्पर्शवत्य आप इत्युक्ते अनुष्णाशीतस्पर्शे वायुपृथिव्यां च उष्णस्पर्शे तेजसि अतिव्याप्तिः तद्वारणाय शीतस्पर्शा इति ॥९०॥ स्पर्शवत् तेज इत्युक्ते पृथिव्यादावतिव्याप्तिः तद्वारणाय उष्णस्पर्शमिति ॥९१॥ स्पर्शवान् वायुरित्युक्ते पृथिव्यादावतिव्याप्तिः तद्वारणाय अरूप इति अरूपो वायुरित्युक्ते आकाशादावतिव्याप्तिः तदर्थं स्पर्शवानिति ॥९२॥ गुणवदाकाशं इत्युक्ते पृथव्यादावतिव्याप्तिः तद्वारणाय शब्दगुणमिति ॥९३॥ आदित्यपरिवर्तनोत्पाद्ययोः परत्वापरत्वयोः असमवायिकारणं कालपिंडसंयोगः तस्यान्तरं कालपिंडः। परत्वापरत्वानधिकरणं कालः पुनः पिंडो ज्येष्ठत्वकनिष्ठत्वापरत्वाधिकरणं भवति कालो मूर्त्तो परत्वापरत्वानधिकरणं काल इत्युक्ते घटस्यानधिकरणं घटो भवति इ

१५४

क्षितावेऽतिव्याप्तिः। तस्मात् सर्वं परत्वाधार चेति पदस्य परित्यजेन परत्वापरत्वाधिकरणत्वात्। एवमपि सामान्यादित्रयेऽतिव्याप्तिस्तस्यापूर्तत्वं तदर्थं असमवायिकारणाधारः एवमपि आकाशेऽतिव्याप्तिस्तदर्थं परत्वापरत्वेति परत्वापरत्वासमवायिकारणाधारः परत्वापरत्वानधिकरणं काल इत्युक्ते दिशिऽतिव्याप्तिस्तदर्थं आदित्यपरिवर्त्तनोत्पाद्येति आदित्यपरिवर्त्तनोत्पाद्य परत्वापरत्वासमवायिकारणाधारः काल इत्युक्ते दिङ्ऽतिव्याप्ति तदर्थं परत्वापरत्वानधिकरणं। ९४। परत्वापरत्वानधिकरणं दिगित्युक्ते सामान्यत्रिकेऽतिव्याप्ति तदर्थं असमवायिकारणाधारः परत्वापरत्वानधिकरणं दिगित्युक्ते आकाशेऽतिव्याप्ति तदर्थं परत्वापरत्वेति पदं एवमपि कालेऽतिव्याप्ति। तदर्थं आदित्यसंयोगानुत्पाद्येति पदं ९५। बुद्धिगुणो यस्य स बुद्धिगुणः। गुणवानात्मा इत्युक्ते घटेऽतिव्याप्ति तदर्थं बुद्धीति पदं। ९६ क्रियाधिकरणं मनः इत्युक्ते पृथ्व्यादावतिव्याप्तिस्तदर्थं स्पर्शशून्यमिति पदं स्पर्शशून्यं मनः इत्युक्ते आकाशेऽतिव्याप्तिस्तदर्थं क्रियाधिकरणमिति। ९७। जातिमद्रूपमित्युक्ते रसादावतिव्याप्ति तदर्थं सर्वं रूपत्वपदं। गुणो रूपमित्युक्ते स्पर्शेऽतिव्याप्ति तदर्थं ग्राह्य इति पदं। चक्षुर्ग्राह्यो गुणो रूपमित्युक्ते संयोगविभागपरत्वापरत्वसंख्यापरिमाणेष्वतिव्याप्ति तदर्थं सर्वं मात्रपदं। संयोगादयः स्पर्शनेन्द्रियेणापि गृह्यन्ते। चक्षुर्मात्रग्राह्यं रूपमित्युक्ते रूपत्वजातौ अतिव्याप्ति तदर्थं गुण इति पदं। चक्षुर्मात्रग्राह्यो गुणो रूपमित्युक्ते प्रदीपादिप्रभासंयुक्ते २

॥आदित्यसंयोगानुत्पाद्यपरत्वापरत्वासमवायिकारणाधार परत्वापरत्वानधिकरणं दिक् ९५ आत्मत्वसामान्यवान् बुद्धिगुणाश्रयश्चात्मा। ९६॥ मनस्त्वजातियोगि स्पर्शशून्यं क्रियाधिकरणं मनः। ९७॥ रूपत्वजातिमच्चक्षुर्मात्रग्राह्यो गुणो रूपं। ९८॥ रसत्वजातियोगी रसनाग्राह्यो गुणो रसः। ९९॥ गंधत्वजातियोगी घ्राणग्राह्यो गुणो गंधः। १००॥ स्पर्शत्वजातियोगी स्प॥

चक्षुषा ज्ञायते न स्पर्शनेन्द्रियेण तस्मात् सर्वं अदृष्टत्वे सतीति पदं ज्ञेयं संयोगो घटप्रदीपाः। प्रसंयोगि दृष्टः एवमपि परमाणुरूपे अतिव्याप्ति उद्भूतत्वं महत्त्वे रूपेऽव्याप्तिः। तत्परमाणुरूपं अदृष्टत्वं न तिन पुनरस्मदादि चक्षुर्मात्रग्राह्यं इत्यव्याप्ति तदर्थं चक्षुर्मात्रग्राह्यो जातिमान् गुणो रूपं चक्षुर्मात्रग्राह्या रूपत्वजातिः परमाणुरूपेऽप्यस्ति। ततः अदृष्टत्वे सति चक्षुर्मात्रग्राह्यजातिमान् गुणो रूपमिति लक्षणं ज्ञेयं। ९८। गुणो रस इत्युक्ते रूपादावतिव्याप्ति। तदर्थं रसनाग्राह्य। एवमपि रसत्वजातावतिव्याप्ति तदर्थं सर्वं गुणः इति पदं। एवमपि परमाणुरसेऽतिव्याप्ति तदर्थं सर्वं जातिमान् रसनग्राह्यजातिमान् गुण इत्युक्ते रूपादावतिव्याप्ति कथं रसनेन्द्रियग्राह्या भवति रसनसत्ता जातिर्गुणत्वं च तद्रूपे सत्त्वे भवति तदर्थं रसनमात्रेति सत्ताजातिरिन्द्रियाणां सर्वेणापि गृह्यते। रसत्वजातिः रसनेनैव रसनमात्रग्राह्यजातिमान् गुणो रस इति लक्षणं। ९९। गुणो गंध इत्युक्ते रूपादावतिव्याप्ति। तदर्थं घ्राणग्राह्यपदं घ्राणग्राह्यो गंध इत्युक्ते गंधत्वजातावतिव्याप्ति। तदर्थं सर्वं गुण इति घ्राणग्राह्यो गुण इत्युक्ते परमाणुगंधेऽव्याप्ति। तदर्थं सर्वं जातिमान् परमाणुगंधे विघ्राणग्राह्या जातिमान् भवति घ्राणग्राह्यजातिमान् गुणो गंध इत्युक्ते रूपादावतिव्याप्तिः कथं घ्राणग्राह्या गंधसत्ता भवति तया जातिमद्रूपं भवति। तदर्थं मात्रेति पदं घ्राणमात्रग्राह्यजातिमान् गुणो गंधः इति लक्षणं द्रष्टव्यं। १००॥ स्पर्शनलक्षणमाह। स्प

रूपं१क, निष्टं३१५

४

॥स्पर्शनग्राह्यो गुणः स्पर्श इत्युक्ते संयोगादावतिव्याप्तिः तदर्थं मात्रपदं। स्पर्शनमात्रग्राह्यः स्पर्श इत्युक्ते स्पर्शत्वजातावतिव्याप्ति तदर्थं गुण इति। एवमपि परमाणुस्पर्शेऽतिव्याप्ति तदर्थं जातिमान् स्पर्शनमात्रजातिमान् गुणः स्पर्श इति लक्षणं ज्ञेयं। कारणं संख्या इत्युक्ते ईश्वरेऽतिव्याप्तिः। तदर्थं असाधारणमिति पदं। ईश्वरः सर्वत्र साधारणं कारणं एवमपि द्रव्येऽतिव्याप्ति द्रव्यव्यवहारे द्रव्यस्यासाधारणकारणत्वात्। तदर्थं गुण इति पदं। गणनाव्यवहारासाधारणं कारणं। संख्या भवति। २। कारणं परिमाणं इत्युक्ते दण्डादावतिव्याप्ति। तदर्थं असाधारणमिति एवमपि संख्यायामतिव्याप्ति तदर्थं मानव्यवहारपदं। ३। कारणं पृथक्त्वमित्युक्ते ईश्वरेऽतिव्याप्ति। तदर्थं असाधारणमिति एवमपि संख्यायामतिव्याप्ति तदर्थं पृथग्व्यवहारे इति पदं। ४। संबंधः संयोग इत्युक्ते समवायेऽतिव्याप्ति तदर्थं अनित्य इति पदं। ५। तथा असाधारणकारणमित्युक्ते ईश्वरेऽतिव्याप्तिः द्रव्यस्य स्वरूपमसाधारणी भवति। तदर्थं विभागपदं। इदमनेन विभक्तं। विभागः एवं परत्वापरत्वयोरपि लक्षणं ज्ञेयं। ६। ७। ८। आत्माश्रयो यस्य प्रकाशस्य आत्माश्रयप्रकाशो बुद्धिरित्युक्ते सूर्यादिप्रकाशेऽतिव्याप्ति तदर्थं आत्माश्रय इति आत्माश्रयो बुद्धिरित्युक्ते आत्मगुणे रागादावतिव्याप्ति तदर्थं प्रकाश इति

स्पर्शनमात्रग्राह्यो गुणः स्पर्शः १। संख्यात्वसामान्यवती गणनासाधारणं कारणं संख्या। २ परिमाणत्वजातियोगि मानव्यवहारासाधारणं कारणं परिमाणं। ३॥ पृथक्त्वजातियोगि पृथग्व्यवहारासाधारणं कारणं पृथक्त्वं। ४ संयोगत्वसामान्यवान् अनित्यः संबंधः संयोगः। ५ विभागत्वसामान्ययोगी विभागः। व्यवहारासाधारणं कारणं विभागः। ६ परत्वसामान्ययोगि परव्यवहारासाधारणं परत्वं। ७। अपरत्वसामान्ययोगि अपरव्यवहारासाधारणं कारणमपरत्वं। ८। बुद्धित्वसामान्यवती आत्माश्रयप्रकाशो बुद्धिः। ९। सुखत्वसामान्यवत् निरुपाध्यनुकूलवेद्यं सुखं। १०। दुःखत्वजातियोगि निरुपाधि प्रतिकूलवेद्यं दुःखं। ११। इच्छात्वसामान्यवती आधिविलक्षणा इच्छा। १२ द्वेषत्वजातिमान् प्रज्वलनात्मको द्वेषः। १३ प्रयत्नत्वसामान्यवान् प्रयत्नः। १४।

॥अनुकूलवेद्यं सुखमित्युक्ते सुखसाधने अतिव्याप्ति। सुखसाधनमपि अनुकूलतया वेद्यते तदर्थं निरुपाधीति पदं निरुपाधिसुखमित्युक्ते दुःखे आकाशेऽपि अतिव्याप्ति तदर्थं अनुकूलवेद्यमिति निरुपाधीति स्वस्वातन्त्र्यतः। दुःखलक्षणमपि एवं ज्ञेयं। १० कलत्रपुत्रवित्तादिना अनेन भवितव्यं इत्येवमर्थः फलं प्रयोजनं अस्य सा अर्थी। अथवा एवमर्थयितशीलमस्य तदर्थाः तद्भावार्थित्वं न लिप्यते अतिलेदना इच्छा इत्युक्ते पुत्रपुत्रध्यादस्कारादाकारलक्षणघटे अतिव्याप्ति तदर्थं अधिवति पदं। १२। यस्मिन् सति दह्यं ज्वलनमिवात्मानं मन्यते स द्वेषः। १३। करणं प्रयत्न इत्युक्ते ईश्वरे अतिव्याप्तिः तदर्थं असाधारणपदं एवमपि रूपेऽतिव्याप्ति तदर्थं प्रयत्नपदं। प्रयत्नस्य कारणं स्यात् तदर्थं व्यवहारपदं। १४। असमवायिकारणं गुरुत्वमित्युक्ते रूपेऽतिव्याप्ति तदर्थं। पतनासमवायिकारणमिति एवमपि वह्निपतनसंयोगेऽतिव्याप्ति तदर्थं एकत्वे इति पदं। एकत्वे पतनासमवायिकारणं गुरुत्वमित्युक्ते वेगेऽतिव्याप्तिः। तदर्थं कथं गुरुत्वात् पतनं पतति पतनात् फले वेगः अस्य ते वेगात्फलवादिनि कर्माः तेषु न पतति। एवं वेगेऽतिव्याप्ति तदर्थं कर्माजन्यत्वमतीति विशेषणं। १५। समवायिकारणं द्रव्यमित्युक्ते रूपेऽतिव्याप्ति। तदर्थं सर्वं

॥स्पंदना। १०१ एवमपि नोदनाभिसंयोगे ऽतिव्याप्ति तद्वा० एकवृत्तिपदं। १५ कारणमित्युक्ते कालेऽतिव्याप्ति। तद्वा० असाधारणपदं। एवमपि तत्त्वरूपे अतिव्याप्ति तद्वा० संग्रहपदं। संग्रहकारणं स्नेह इत्युक्ते संग्रहाश्रयद्रव्ये अतिव्याप्ति तद्वा० असाधारणपदं। संग्रहासाधारणं कारणं स्नेह इत्युक्ते द्रव्यत्वेति अतिव्याप्ति कथं यदानीं आम घटे अग्निपततिः तदा लाक्षायां वह्निसंयोगाद् द्रवत्वमुत्पद्यते। नास्तिसंयोगे न द्रवत्वमग्नौ लाक्षा गुटिकान्न वर्तित इत्यर्थं द्रवत्वसमान्यमिति। १६। संस्कारोत्पत्तेर्द्रव्यस्य आदर्शा अवस्था तादृशीमेवावस्थां द्रव्यं प्रापयति संस्कारः। द्रव्ये बाणादौ कर्मोत्पद्यते कर्मतो वेगोत्पत्तिः उत्पन्नो वेगापि कर्मीण दृढो आरत्तत इति द्रव्यस्य स्वावस्थापत्ति र्गोः ज्ञानात्संस्कारो भावना। भावनात स्मृतिः इति भावनाख्यसंस्कारे द्रव्यस्य स्वावस्थापकस्योत्पत्तिरिति साकांक्षपरिहाराय स्वपदं गुणः संस्कार इत्युक्ते रूपादावतिव्याप्ति तद्वा० उत्पत्त्यवस्थापादकः। उत्पत्त्यवस्थापादकः संस्कार इत्युक्ते संस्काराश्रये द्रव्ये इति व्याप्ति तद्वा० गुण। १७॥ असाधारणं कारणं धर्म इत्युक्ते दृयादावतिव्याप्ति। तद्वा० सुखेतिपदं। सुखकारणं कर्म इत्युक्ते आत्मन्यति सिद्ध इत्युक्ते आत्मन्यति व्याप्तिस्तद्वारणार्थं असाधारणपदं। १९। अधर्मलक्षणमिप

व्यवहारासाधारणं कारणं धयन्त्व॥१४ गुरुत्वजातिमदेकवृत्ति पतनासमवायिकारणं गुरुत्वं। १५ द्रवत्वजातिमदेकवृत्ति स्यंदनासमवायिकारणं द्रवत्वं। १६। स्नेहत्वसामान्यवान् द्रवत्वसंग्रहासाधारणं कारणं स्नेहः। १७। संस्कारत्वजातिमान् स्वोत्पत्ति अवस्थापादको गुणः। संस्कारः १८। धर्मत्वसामान्यवान् सुखासाधारणं कारणं धर्मः। १९। अधर्मत्वसामान्यवान् दुःखासाधारणं कारणं अधर्मः। २०। शब्दत्वजातियोगी श्रोत्रग्राह्यो गुणः शब्दः। २१। उत्क्षेपणत्वजातिमदूर्ध्वदेससंयोगकारणं कर्मोत्क्षेपणं। २२ अपक्षेपणत्वजातिमदधोदेससंयोगकारणं कर्मापक्षेपणं। २३। आकुंचनत्वजातिमद्वक्रत्वापादकं कर्माकुंचनं २४। प्रसारणत्वजातिमदृजुत्वापादकं कर्मप्रसारणं। २५। गमनत्वजाति॥

मित्येव अवज्ञेयः। २०। श्रोत्रग्राह्यः शब्द इत्युक्ते शब्दत्वजातावतिव्याप्ति। तद्वारणार्थं गुण इतिपदं। २१। जातिमदूर्ध्वेपणमित्युक्ते अपक्षेपणे अतिव्याप्तिः तद्वा० उत्क्षेपणत्वेति॥ कर्मोत्क्षेपणमित्युक्ते अपक्षेपणे ऽव्याप्तिः। तद्वा० कारणमिति कारणं कर्मोत्क्षेपणमित्युक्ते अपक्षेपणे अतिव्याप्ति तद्वारणार्थं संयोगकारणं। एवमपि अपक्षेपणे अतिव्याप्ति तद्वारणार्थं ऊर्ध्वदेशेतिपदं। ऊर्ध्वदेशसंयोगकारणं उत्क्षेपणमित्युक्ते कर्माश्रये द्रव्ये तिव्याप्ति तद्वारणार्थं कर्मेति। २२। संयोगकारणं कर्म अपक्षेपणमित्युक्ते गमनेत्क्षेपणे अतिव्याप्ति। तद्वा० अधोदेसेतिपदं। गमनमनियतदेशसंयोगकारणं उत्क्षेपण ऊर्ध्वदेश। संयोगकारणं अधोदेससंयोगकारणमपक्षेपणे इत्युक्ते द्रव्ये अतिव्याप्तिः तद्वारणार्थं कर्मेति २४ कर्म आकुंचनं इत्युक्ते उत्क्षेपणादावतिव्याप्ति तद्वा० वक्रत्वापादकमिति। वक्रत्वापादकं कर्म इत्युक्ते द्रव्येतिव्याप्ति। तद्वारणार्थं कर्मेतिपदं। २४। एवं प्रसारणलक्षणमपि। २५। कर्मगमनमित्युक्ते प्रसारणे ति व्याप्ति। तद्वारणार्थं संयोगकारणमिति एवमपि उत्क्षेपणे अतिव्याप्ति। तद्वारणार्थं अनियतदेससंयोगकारणं। २६। व्यापकं सामान्यं परं इत्युक्ते॥

॥परापरे अतिव्याप्ति। तद्वा० मात्रपदं। २७ व्याप्यं सामान्यमपरमित्युक्ते परापरे तिव्याप्ति तद्वारणार्थं मात्रपदं। २८। व्याप्यरूपं परापरमित्युक्ते परेतिव्याप्तिस्तद्वारणार्थं व्यापकमिति २९ सांतप्रागभाव इत्युक्ते घटे तिव्याप्ति तद्वा० अनादिरिति। अनादिः प्रागभाव इत्युक्ते आकाशे तिव्याप्ति तद्वा० सांत इति। ३० सादिर्ध्वंसाभाव इत्युक्ते घटे तिव्याप्ति। तद्वा० अनंत इति। अनंतध्वंसाभाव इत्युक्ते आकाशे तिव्याप्ति। तद्वा० सादिरिति। ३१। अनादिरत्यंताभाव इत्युक्ते प्रागभावे तिव्याप्ति। तद्वा० अनंत इति अनंतोऽत्यंताभाव इत्युक्ते ध्वंसाभावे अतिव्याप्ति तद्वारणार्थं अनादि। अनादिरनंतो अत्यंताभाव इत्युक्ते अन्योन्याभावे अतिव्याप्ति। तद्वा० संसर्गेति पदं। ३२। निषेधो अन्योन्याभाव इत्युक्ते अत्यंताभावे अतिव्याप्ति तद्वा० तादात्म्येतिपदं। घटः पटो न भवति घटस्य घटत्वाभावनिषेध्यते ३३। पृथिव्यादि चतुर्ष्विद्वविधौ नित्या अनित्याश्च तत्र नित्या अनित्य लक्षणमाह। ३४॥ ३५। परमाणुरूपा नित्याः। तत्र परमाणुलक्षणमाह। निरवयवपरमाणुरित्युक्ते आकाशे अतिव्याप्ति तद्वा० क्रियावानिति। क्रियावान् परमाणुरित्युक्ते घटे अतिव्याप्ति तद्वारणार्थं निरवयव इति ३६॥ अवयवलक्षणमाह। समवायिकारणमवयव इत्युक्ते आकाशे तिव्याप्ति तद्वा० द्रव्येति ३७। अंत्यावयवि विशरीरमुत्तरत्र कथयि

॥जातिमदनियतदेशसंयोगकारणं गमनं। २६ व्यापकमात्रं सामान्यं परं। २७। व्याप्यमात्रं सामान्यमपरं। २८। व्याप्यव्यापकरूपं गुणत्वद्रव्यत्वादि सामान्यं परापरं। अनादिः सांतः प्रागभावः। ३० सादिरनंतः ध्वंसाभावः। ३१ अनादिरनंतः संसर्गाभावो अत्यंताभावः। ३२। तादात्म्यनिषेधो अन्योन्याभावः। ३३ नित्यत्वं ध्वंसविरहः। ३४ अनित्यत्वं ध्वंसवत्वं। ३५ निरवयवः क्रियावान् परमाणुः। ३६ द्रव्यसमवायिकारणमवयवः। ३७। द्रव्यानारंभकं कार्यद्रव्यं अंत्यावयवि ३८। प्रागभाववत्कार्यं। ३९। भोगायतनमंत्यावयवि शरीरं। ४० स्वसमवेतसुखदुःखान्यतरसाक्षात्कारो भोगः। ४१॥ यदवच्छिन्नात्मनि भोगस्तदायतनं। ४२। साक्षात्कारिज्ञानकरणमिंद्रियं। ४३॥

भ सा तद्धर्मित्वावयविलक्षणमाह। कार्यद्रव्यमंत्यावयवि इत्युक्ते घटे अतिव्याप्ति तद्वारणार्थं नारंभकमिति ३८ अनारंभकमंत्यावयवि इत्युक्ते आकाशादावतिव्याप्ति। तद्वारणार्थं कार्यपदं। ३८॥ यश्च कार्यरूपा नित्यत्वात् छिन्नं तत्र कार्यलक्षणं यति प्रागभाववदिति। ३९। एवं शरीरेंद्रियविषयरूपं त्रिविधं तत्र शरीरलक्षणयति। अंत्यावयवि शरीरमित्युक्ते घटादावतिव्याप्ति तद्वारणार्थं भोगायतनमिति भोगायतनं शरीरमित्युक्ते इंद्रिये अतिव्याप्ति तद्वारणार्थं अंत्यावयवीति कोऽसौ भोग इत्याह। ४० साक्षात्कारो भोग इत्युक्ते घटसाक्षात्कारे अतिव्याप्ति। तद्वारणार्थं सुखदुःखसाक्षात्कारः। सुखदुःखसाक्षात्कारो भोग इत्युक्ते सुखदुःखान्यतरसाक्षात्कारे अतिव्याप्ति तद्वारणार्थं अन्यतरेति। एवमपि ईश्वर अस्मदीय सुखदुःखान्यतरसाक्षात्कारं जानाति तद्वारणार्थं स्वसमवेतेति। ४१। भोगायतनं आत्मना यदवच्छेदकं तदायतनं। यदायतनं भोगायतनमित्युक्ते भोगस्यातिव्याप्ति तद्वारणार्थं आत्मनीति आत्मनि भोगस्तदायतनमित्युक्ते पुनरपि भोगे अतिव्याप्ति तद्वारणार्थं मवच्छिन्नेति। ४२। शरीरलक्षणमुक्त्वा इंद्रियलक्षणमाह। साक्षात्कारत्पद्यकं करोतीति करणं यज्ज्ञानं ज्ञानं साक्षात्कारि एवं विधं यज्ज्ञानं तस्य

॥कारणमिंद्रियं इत्युक्ते लिंगाद्यावतिव्याप्तिः तद्वारणाय सर्वं साक्षात्कारीति साक्षात्कारि कारणमिंद्रियमित्युक्ते ज्ञानेति तद्वा० ज्ञानेति पदं॥४३॥ भोगकारणविषयत्वमित्युक्ते शरीरेंद्रि
यः याश्रितिव्याप्तिः तद्वा० शरीरेंद्रियसंबंधेनेति ज्ञानव्यां। न अविशरीरेंद्रियभोगसाधनेसवतः श्रन्क वेदनादिविषयः। शरीरेंद्रियसंबंधभोगसाधनं भवति नासंबद्धः।
इति नातिव्याप्तिः नहि शरीरं शरीरसंबद्धं इंद्रियमिंद्रियसंबद्धं भवति॥४४॥ आकाशशरीरं चतुर्विधं इंद्रियं चतुर्विधं विषयश्चेति प्रतिज्ञासंतत्सज्ञितं। यदुक्तं तेजसो विषय
चतुर्धा भौमादि तल्लक्षयति। पार्थिवमात्रं काष्ठादिइंधनं यस्य तत्तेजसो भौमं॥ तेजोभा भौममित्युक्ते दिव्यादिष्वतिव्याप्तिः तद्वारणाय पार्थिवेंधनमिति एवमपि उदर्ये
ष्वतिव्याप्तिः तद्वा० मात्रेति॥४५॥ जलेंधनं तेजो दिव्यमित्युक्ते उदर्ये अतिव्याप्तिः तद्वारणाय सर्वमात्रेति॥४६॥ जलेंधनं तेजः उदर्यमित्युक्ते दिव्येतिव्याप्तिः तद्वा० पार्थिवेंधनमिति
पार्थिवेंधनं तेजः इत्युक्ते भौमे अतिव्याप्तिः तद्वा० जलेंधनमिति॥४७॥४८॥ सर्वाण्युत्पत्तिमंति आकाशादीनि तेषामुत्पत्तिकालस्थितिविनाशलक्षणं इत्युक्ते तत्रोत्पत्तिं लक्षयति
कारणयौगपद्यमित्युक्ते कियत्कारणानां यौगपद्ये उत्पत्तिर्न स्यादिति। अत आह सकलकारणेति॥४९॥ किं तद्यौगपद्यमित्याह। क्षणसंबंधो यौग
पद्यं इत्युक्ते घटस्य लक्षणेन सह संबंधः तत्रातिव्याप्तिः तद्वारणाय सर्वं अनेकेषामिति। अनेकेषां क्षणसंबंधो यौगपद्यं इत्युक्ते वस्तूनां वस्तूनां क्रमेण क्षणेन

॥आत्मनो भोगाकारणं विषयः॥४४॥ पार्थिवमात्रेधनं तेजो भौमं॥४५॥ जलमात्रेधनं तेजो दिव्यं॥४६॥ पार्थिवजलेधनं तेज उदर्यं॥४७॥ निरिंधनं
तेज आकरजं तच्च सुवर्णादि॥४८॥ सकलकारणयौगपद्यमुत्पत्तिः॥४९॥ अनेकेषामेकक्षणसंयोगो यौगपद्यं॥५०॥ विनाशानुत्पाद्य
विनाशप्रागभावसंबंधः कर्मावच्छिन्नकालः क्षणः॥५१॥ तन्मात्रावस्थायित्वं क्षणिकं॥५२॥ स्थितिर्वर्त्तमानत्वं। तच्च प्राक्संबंद्धस्वाभा
वः इहितस्वरूपं ध्वंसकार्यप्रागभावसंबद्धत्वं वा॥५३॥ विनाशः प्रध्वंसः॥५४॥ शरीरसंबंधेन ज्ञानवत्त्वं क्षेत्रज्ञत्वं॥५५॥
प्रत्यात्मसमवेतधर्मोपिनीतत्वं प्रत्यात्मनिष्ठत्वं॥५६॥ श्रीः॥ वः॥

संबंधो अस्तित्वातिव्याप्तिस्तदर्थमिकेति पदं। विनाशेनानुत्पाद्य इत्यस्यायं अर्थो विनाशस्य प्रागभावः। तेन संबंधं यत्कर्म तेनावच्छिन्नः सकालः॥ कालः क्षण इत्युक्ते अस्मि
न्महाकाले अतिव्याप्तिः तद्वा० अवच्छिन्न इति। एवं चत्र मपि द्वित्रिक्षणावस्थायिकर्मावच्छिन्ने काले अतिव्याप्तिः तद्वा० प्रागभावसंबंधेति। एवमपि कस्य प्रागभावः
इति साकांक्षं स्यात्। तद्वा० विनाशेति पदं वाच्यं तत्र। यदि त्वत्र विनाशप्रागभावस्य तेनाविनकर्मसंबंधः तद्वा० विनाशाद्येति पदं॥५१॥ क्षणावस्थायि क्षणिकमित्युक्ते
यद्वा द्वित्रिक्षणावस्थायि तत्क्षणावस्थायि क्षणिकत्वं नास्ति तत्रातिव्याप्तिः तद्वारणाय मात्रेति पदं॥५२॥ वर्त्तमानत्वं प्राक्कालेन सह संबंधः स्वस्याभावस्य तेन रहितं स्वरूपं तद्धि
त यस्य तस्याभावः स्वरूपवत्त्वं प्राक्संबद्धस्वभावरहिता। वर्त्तमानत्वमित्युक्ते ध्वंसे अतिव्याप्तिः तद्वा० स्वरूपवत्त्वमिति उत्पन्ने ध्वंसे प्रतियोगिना सह संबंधोयं
प्रध्वंसस्याभाव अनुत्पन्ने। तद्विहितत्वमाह प्रध्वंसेन स्वरूपवत्त्वं स्वस्यैति स्वस्य कार्यं तस्य प्रागभावः तेन संबद्धत्वं वर्तमानत्वं स्वसंबद्धेनतत्तत्वः उच्यते तेषां कार्यप
टः। तस्य प्रागभावः तेन संबद्धत्वं वर्तमानत्वं ज्ञानवत्त्वं इत्युक्ते ईश्वरे अतिव्याप्तिः तद्वारणाय शरीरसंबंधेनेति॥५५॥ सर्वमनप्रत्यात्मनिष्ठत्वादनंतं तु उक्तं॥

६

॥तत्प्रत्यात्मनिष्ठत्वं लक्षयति आत्मानमात्मानं प्रति समवेतो यो धर्मो धर्मिणीत्यात्मनः समवेतप्र इति प्रत्यात्मनिष्ठत्वं अत्र न्यायवृत्ति पदं। सितत्वजातिमत्सितं ओदित्वजातिमन्नोदितं इत्या २
दिसर्वं विज्ञेयं॥५७॥५८॥५९॥६०॥६१॥६२॥ सर्वसंयोगम्पदे विध्युक्तं। कर्मजः संयोगः इत्युक्ते अनित्ययामध्ये कर्मजस्य जन्म क्षणमाह। कर्म असमवायिकारणं यस्य स तथा संयोगः। कर्मजः
इत्युक्ते संयोगजे अतिव्याप्तिः तद्वा० कर्मासमवायिकारणः कर्मासमवायिकारणः कर्मजः इत्युक्ते कर्मजे विभागे अतिव्याप्तिः तद्वा० संयोग इति॥६३॥ संयोगजं लक्षयति सं
योगासमवायिकारणं यस्य तत्तथा॥६४॥६५॥ विभागजं लक्षयति विभागासमवायिकारणो गजः इत्युक्ते शब्दे अतिव्याप्तिः तद्वा० विभाग इति पदं॥६६॥ परत्वापरत्वकालकृतमि
त्युक्ते दिक्कृते परत्वापरत्वे अतिव्याप्तिः तद्वा० आदित्यपरिवर्त्तनोत्पाद्यः॥६७॥ एवं दिक्कृतलक्षणमपि॥६८॥ सर्वबुद्धिस्मृतिरनुभवश्चेति द्विधोक्तौ तत्र स्मृतिं लक्षयति भावनासाधा
रणकारणं यस्य तथा ज्ञानं स्मृतिरित्युक्ते अनुभवे अतिव्याप्तिः तद्वा० भावनाकारणं एवमपि प्रत्यभिज्ञायामतिव्याप्तिः तद्वा० असाधारण पदं प्रत्यभिज्ञाने चक्षुष्यं संनिकर्षो
उत्पद्यते। स्मृतिस्तु भावनया एवोत्पद्यते॥६९॥ ज्ञानमनुभव इत्युक्ते स्मृतावतिव्याप्तिः। तद्वा० अस्मृतिरूपमिति॥७०॥ अनुभवप्रमा इत्युक्ते अप्रमायामतिव्याप्तिः तद्वा०
तद्वेति॥७१॥७२॥ अनवधारणं अनिश्चयात्मकं ज्ञानं विपर्ययः इत्युक्ते संशयेतिव्याप्तिः तद्वा० अवधारणरूपं॥ विअस्वज्ञानमस्यावधारणमित्यवधारणरूपमवधा

॥सितादीनां समानां सितत्वादिकं लक्षणं॥५७॥ मधुरादीनां समानां मधुरत्वादिकं॥५८॥ गंधयोः सुरभित्वासुरभित्वे लक्षणे॥५९॥ शीतादीनां शीतत्वादिकं॥६०॥
एकादीनामेकत्वादिकं॥६१॥ अण्वादीनामणुत्वादिकं॥६२॥ कर्मासमवायिकारणः संयोगः कर्मजः॥६३॥ संयोगासमवायिकारणसंयोगः संयोगजः॥६४॥ ४
कर्मासमवायिकारणो विभागः कर्मजः॥६५॥ विभागासमवायिकारणो विभागो विभागजः॥६६॥ आदित्यपरिवर्त्तनोत्पाद्यः परत्वापरत्वे कालकृते॥६७॥
आदित्यसंयोगासंयोगानुत्पाद्ये परत्वापरत्वे दिक्कृते॥६८॥ भावनासाधारणं कारणं ज्ञानं स्मृतिः॥६९॥ अस्मृतिरूपं ज्ञानमनुभवः॥७०॥ तच्चानुभवप्रमा ७१
अतद्वज्ज्ञानमप्रमा॥७२॥ अनवधारणं ज्ञानं संशयः॥७३॥ अवधारणरूपा तद्वतानविपर्ययः॥७४॥ अज्ञानमानकारणजन्यत्वानुभवप्रत्यक्षं॥७५॥ ज्ञा
यमानकारणजन्यत्वानुभवोनुमितिः॥७६॥ प्रमायोगव्यवच्छिन्नं प्रमाणं॥७७॥ प्रत्यक्षप्रमायोगव्यवच्छिन्नं प्रत्यक्षं॥७८॥ तच्च स्वरःघ्राणरसनच

हुस्पर्शनश्रोत्रम
नोलक्षणं॥७९॥
अनुमितिप्रमायाअ
योगविवछिन्नमनु
मानं॥८०॥

रणज्ञानं विपर्ययः इत्युक्ते समयप्रज्ञाने अतिव्याप्तिः तद्वा० अतद्वज्ज्ञानं सत्यादिविपर्ययपर्यंतं क्रमप्राप्तं प्रत्युक्तं। लक्षितं प्रत्यक्षप्रमादिवसंगतो लक्षयति॥७४॥ अनुभव
प्रत्यक्षः। प्रमा इत्युक्ते अप्रमायामतिव्याप्तिः तद्वा० तद्वेति। एवमपि अनुमितिप्रमायामतिव्याप्तिः तद्वा० अज्ञायमानकारणजन्य इति॥७५॥ अनुभवो अनुमितिप्रमा इत्युक्ते अ
नुमानाभासे अतिव्याप्तिः॥ तद्वा० तद्वेति। एवमपि प्रत्यक्षप्रमायामतिव्याप्तिः। तद्वा० ज्ञायमानकारणजन्य इति॥७६॥ प्रमाणसामान्यं लक्षयति प्रमायाअयोगव्यवछिन्नं
प्रमाणं। प्रमाणेन प्रमायाः अयोगो व्यावर्त्यते। यत्र प्रमाणं तत्र ज्ञानं तस्याभावो नास्ति॥७७॥ प्रत्यक्षप्रमाणं लक्षयति। चक्षुसंनिकर्षे सति घटज्ञानमुत्पद्यते। असंनिकर्षे ज्ञान
नाभावः प्रमायोगव्यवच्छिन्नं प्रत्यक्षप्रमाणमित्युक्ते अनुमितिप्रमायामतिव्याप्तिः तद्वा० ॥७८॥७९॥ प्रमायोगव्यवच्छिन्नमनुमानमित्युक्ते प्रमाणे अतिव्याप्तिः तद्वा० अनु
मितीति॥८०॥ ज्ञानमनुमानमित्युक्ते घटज्ञाने अतिव्याप्तिः॥

॥तद्यथा॥ लिंगज्ञानमिति॥ एवमपि लिंगाभासे अतिव्याप्तिः। तद्यथा॥ व्याप्तिपक्षधर्मताविशिष्टेतिपदं। व्याप्तिविशिष्टं लिंगज्ञानमनुमानं इत्युक्ते अग्निमानाकाशं सामान्यवत्त्वात् घटवत् इत्यत्रातिव्याप्तिः तद्यथा॥ पक्षधर्मतेतिपदं। अत्र च न पक्षधर्मता पक्षधर्मताविशिष्टं लिंगज्ञानमनुमानम् इत्युक्ते नित्यः शब्दः कृतकत्वात्। घटवत् इत्यत्रातिव्याप्तिः तद्यथा॥ व्याप्तिविशिष्टेति॥८१॥ व्याप्तेर्लक्षणमाह॥ व्याप्यमधिकरणं यस्य स तथा स चासौ उपाध्यभावविशिष्टश्चासौ संबंधश्च। व्याप्याधिकरणोपाध्यभावविशिष्टः। व्यापकस्य व्याप्यनिष्ठो निरुपाधिसंबंधो व्याप्तिरित्यर्थः। संबंधव्याप्तिरित्युक्ते अग्निमान् धूमवानित्यत्र सोपाधिके अनुमाने अतिव्याप्तिः तद्यथा॥ उपाध्यभावविशिष्ट इति एवमपि व्याप्यव्यापकस्यावस्थितयोः संयुक्तो घटेऽपि स्यादिति॥ तद्यथा॥ व्यापकस्य व्याप्याधिकरणेति॥८२॥ पक्षधर्मतां लक्षयति पक्षसंबंधः पक्षधर्मतेत्युक्ते पर्वते ह्रदादिसंबंधोऽस्ति तत्रातिव्याप्तिः तद्यथा॥ व्याप्यस्येति पदं॥८३॥८४॥८५॥ उपाधेर्लक्षणमाह॥ साध्यव्यापक उपाधिरित्युक्ते इंधनाधिमत्त्वे उपाधिः स्यात्। तद्यथा॥ साधनाव्यापक इति। यत्र धूमवत्त्वं तत्रेंधनादिमत्त्वं इत्ययं साधनाव्यापकः साधनाव्यापक उपाधिरित्युक्ते तेंधनादिमत्त्वे उपाधिः पर्वतध्(मे) अस्ति न तत्रेंधनादिरिति साध्य-

॥तत्तु व्याप्तिपक्षधर्मताविशिष्टलिंगज्ञानं॥८१॥ व्याप्तिश्च व्यापकस्य व्याप्याधिकरणोपाध्यभावविशिष्टसंबंधः॥८२॥ पक्षधर्मता च व्याप्यस्य पक्षसंबंधः॥८३॥ व्यापकं साध्यं॥८४॥ व्याप्यं लिंगं॥८५॥ उपाधिश्च साधनाव्यापकत्वे सति साध्येन समव्याप्तिः॥८६॥ पक्षव्यापकः। सपक्षस्पर्शी विपक्षशून्यो अबाधितः। विषयो असत्प्रतिपक्षः। केवलान्वयी॥८७॥ पक्षव्यापकः सपक्षशून्यो विपक्षाद्व्यावृत्ति अबाधितविषयो असत्प्रतिपक्षः केवलव्यतिरेकी॥८८॥ पक्षव्यापक सपक्षस्पर्शी विपक्षाद्व्यावृत्तो अबाधितविषयासत्प्रतिपक्षो अन्वयव्यतिरेकी॥८९॥ संदिग्धसाध्यधर्मविनोपातत्वं पक्षत्वं॥९०॥ निश्चितसाध्याधिकरण-

।नाव्यापकः स्यात् तद्यथा॥ साध्यव्याप्तिरिति पदं। प्रदेशांतरे नाकादिसंतिलवह्निः साधनाव्यापकत्वे सति साध्यव्याप्तिपक्षेतरत्वमुपाधिः स्यात्। तद्यथा॥ समेति पदं॥८६॥ पक्षव्यापकः केवलान्वयीत्युक्ते केवलव्यतिरेक्यपि। तद्यथा॥ सपक्षस्पर्शीति सपक्षवृत्तिरित्यर्थः। एवमपि अन्वयव्यतिरेक्यपि तद्यथा॥ विपक्षशून्य इति सर्वत्र कालात्ययापदिष्टः प्रकरणसम व्यवच्छेदार्थः अबाधितविषयो असत्प्रतिपक्ष इति विशेषणद्वये विपक्षशून्यः केवलान्वयी इत्युक्ते सर्वमनित्यं सत्त्वात् इत्यत्र व्यभिचरितसंदेहातिव्याप्तिः तद्यथा॥ सपक्षस्पर्शीति सपक्षस्पर्शी स्पर्शशून्यो विपक्षः इत्युक्ते जातिमनित्यं सामान्यवत्त्वात्। घटवदित्यसिद्धे संदेहे अतिव्याप्तिः। तद्यथा॥ पक्षव्यापक इति॥८७॥ पक्षव्यापकः केवलव्यतिरेकी इत्युक्ते अन्वयव्यतिरेक्यपि तिव्याप्तिः। तद्यथा॥ सपक्षशून्य इति एवमपि सर्वमनित्यं सत्त्वात्। इत्यन्यत्र व्यभिचरितसंदे अतिव्याप्तिः। तद्यथा॥ विपक्षाद्व्यावृत्तिः केवलव्यतिरेकी इत्युक्ते अन्वयव्यतिरेक्यपि तिव्याप्तिः। तद्यथा॥ सपक्षशून्य इति सपक्ष-

॥शून्यो विपक्षाद्व्यावृत्तः केवलव्यतिरेकी इत्युक्ते एवमादि सर्वमनित्यं सामान्यवत्त्वात् इत्यत्र व्यभिचरितसंदे अतिव्याप्तिः तद्यथा॥ सर्वपक्षव्यापक इति॥८८॥ पक्षव्यापको अन्वयव्यतिरेकी इत्युक्ते केवलव्यतिरेक्यपि तिव्याप्तिः तद्यथा॥ सपक्षस्पर्शीति एवमप्यनेकांते। तद्यथा॥ विपक्षाद्व्यावृत्त इति विपक्षाद्व्यावृत्तो अन्वयव्यतिरेकी इत्युक्ते केवलव्यतिरेक्यपि तिव्याप्तिः तद्यथा॥ सपक्ष इति सपक्षस्पर्शी विपक्षाद्व्यावृत्तो अन्वयव्यतिरेकी इत्युक्ते अनित्यः शब्दः चाक्षुषत्वात्। घटवदित्यसिद्धिसंदेहे तिव्याप्तिः। तद्यथा॥ पक्षव्यापक इति॥८९॥ उपक्षं पक्षत्वमित्युक्ते साध्याभाववत्या अपि तेन विपक्षत्वं न स्यात्॥ तद्यथा॥ साध्यत्वेनेति। एवमपि सपक्षे अतिव्याप्तिः तद्यथा॥ संदिग्धेति पदं॥९०॥ अधिकरणत्वं सपक्षत्वं इत्युक्ते साध्याभावाधिकरणत्वं विपक्षत्वं। तद्यथा॥ साध्येतिपदं। एवमपि पक्षे अतिव्याप्तिः। तद्यथा॥ निश्चितेति॥९१॥ अनधिकरणत्वं विपक्षत्वमित्युक्ते साध्याभावानधिकरणत्वे सपक्षत्वे इति तद्यथा॥ साध्यानधिकरणमिति। एवमपि पक्षे अतिव्याप्तिः तद्यथा॥ निश्चितेति यदि साध्याधिकरणः पक्षः स्यात् पक्षस्य चक्रं स्यात्। साध्यतद्वत्तार्थो साध्यसंदिग्धं यदा एकं साध्यं साधयति तदा अन्यपक्षस्तावत् साधयति इत्यकतरपक्षे साध्यानधिकरणत्वं तदवियुक्तं निश्चितेति॥९२॥ अर्थद्वैविध्येन लिंगगमकत्वं। अश्लीलिंगे उपदेशेन पक्षे न केवले न लिंगे न लिंगगमकत्वं स्वार्थं॥९३॥ यत्र शाब्दे व्याप्तिपक्षधर्मतां बोधयति लिंगं च लिंगेनैव तत्परार्थं शाब्दरूपत्वेन न वक्ष्ये सपक्षो॥९४॥ लिंगव्याप्तिपक्षधर्मताविशिष्टेन लिंगेन।

त्वं सपक्षत्वं॥९१॥ निश्चितसाध्यानधिकरणत्वं विपक्षत्वं॥९२॥ स्वार्थमर्थरूपत्वं॥९३॥ परार्थं शाब्दरूपत्वं॥९४॥ शाब्दस्याप्यनुमानविषयत्वेनाविनाभावोपजीवकत्वेनानुमानत्वं॥९५॥ तत्र पक्षवचनं प्रतिज्ञा॥९६॥ लिंगस्य पक्षधर्मत्ववचनं हेतुः॥९७॥ दृष्टांतवचनमुदाहरणं॥९८॥ लिंगपरामर्शवचनमुपनयः॥९९॥ लिंगसंबंधयुक्तनिश्चितसाध्यवचनं निगमनं॥१००॥ अंगवैकल्यमात्रासद्वैर्लिंगत्वेनानिश्चितत्वमसिद्धत्वं॥१॥

लिंगं ज्ञाप्यते तत्परार्थं॥९४॥ स्वतंत्र एव प्रमाणे कस्मिंश्चित् तृतीयप्रमाणमागमो अस्ति तत्राह॥ अनुमानस्य विषय एव विषयो यस्य स तथा तस्य भावो अनुमानविषयत्वं तेन अनुमानरूपत्वेनेत्यर्थः यथानुमाने लिंगं तथैव शाब्देपि लिंगं। शब्दप्रमाणतया ज्ञातो बोधयति विपक्षाव्यावृत्तार्थः संसर्गविद् लिंगं। एवं शब्दप्रमाणपक्षे। शाब्दसंसर्गं ज्ञापयति। न च विपक्षे शाब्दानुमानवादी एवं कथयति शाब्दविपक्षज्ञाने विपक्षान्तः संसर्गबुद्धिरेव। कस्मात्। तथा विशेषणाभावात्। अन्वयाद्युपवाचकत्वावां। एवमपि विना तावेन विप्रलंभकशाब्दे व्याप्तिः। तत्र वाच्यं नास्ति। तत्र व्यभिचार तदर्थं दृष्टीत्यसंकेतितं इति ज्ञातव्यं॥९५॥९६॥ लिंगस्य वचनं हेतुरित्युक्ते लिंगस्यातिव्याप्तिः तद्यथा॥ पक्षधर्मत्वेति यथा अयं पर्वतो धूमवानित्युक्ते पक्षधर्मत्ववचनं हेतुः॥९७॥ दृष्टांतवचनमुदाहरणमित्युक्ते दृष्टांताभासे अतिव्याप्तिः तद्यथा॥ सम्यगिति विशेषणं ज्ञेयं॥९८॥ एकवारमुक्तलिंगं पुनरपि तद्वाक्ये धूयते तत्परामर्शः। व्याप्तिसमरोद्बोधार्थः इति पुनर्निगमनावसरे। तथाचायं धूमवानिति परामर्शः॥९९॥ लिंगस्य साध्येन संबंधो लिंगसंबंधः तेन प्रयुक्तं निश्चितसाध्यत्वं तस्य वचनं वचनं निगमनमित्युक्ते हेतुवचनेऽतिव्याप्तिः तद्यथा॥ साध्यत्वेति पदं। पुनरपि साध्यत्वेति। व्याप्तिः तद्यथा॥ निश्चितेति पदं। एवमपि लिंगाभासे अतिव्याप्तिः तद्यथा॥ लिंगसंबंधयुक्तेति पदं॥१००॥ वैकल्यमित्युक्ते अंगानां वैकल्ये सदनुमाने अतिव्याप्तिः तथा अंगविकल्प्यो। पक्षधर्मत्वेनानिश्चितत्वं असिद्धत्वं एतल्लक्षणं। अनिश्चितत्वमसिद्धमित्युक्ते साध्यसाधकत्वेनानिश्चितत्वे अनैकांतिके अतिव्याप्तिः तद्यथा॥ पक्षधर्मत्वे-

नेति॥१॥

पक्षसपक्षस्पर्शित्वं विरुद्धत्वमित्युक्ते। अनित्यः शब्दः प्रमेयत्वात् घटवत्। इत्यनैकान्तिके अतिव्याप्तिः तदर्थं मात्रेति विपक्षस्पर्शी विरुद्धः इत्युक्ते नित्यमाकाशं सत्त्वात्। इत्य
वत्। इत्यत्र हि तत्र हेतौ अतिव्याप्तिः तदर्थं मात्रेति एवमपि नित्यमाकाशं अकृतकत्वात् घटवत्। इत्यत्रापि हेतौ अतिव्याप्तिः तदर्थं पक्षेति ३। ४। साध्यतद
भावव्याप्तयोर्व्यभिचारस्तत्साधकत्वं एको भावं साधयति। अन्यो विपरीतं साध्यसाधकौ। संदिग्धश्चेति इत्युक्ते सपक्षे ऽतिव्याप्तिः त० तदभावे साध्यत्वेति सं० इत्युक्ते पक्षे ऽतिव्याप्ति
तदर्थं साध्येति पदं। संदिग्ध इति नाम कानुमानेन प्रकरणसम इति त्रयो गृह्यते। ५। अनुमानानामपि तेषां प्रत्यक्षेण न निश्चितसाध्यं तत्साध्यविपरीतं कालात्ययापदि
ष्टं। अग्निरनुष्णः इत्यत्र हेतुः कृतकत्वात् इत्येतद्वनुमानं प्रत्यक्षबाधितं। प्रत्यक्षेण अनुष्णो ऽग्निर्भवति तत्प्रत्यक्षं न चानीतत्वं इति एतद्विपरीतत्वं वि
परीतत्वं कालात्ययापदिष्टत्वं इत्युक्ते साध्याभावाद्विपरीतं साध्यं परस्पराणेपेक्ष्या विपरीतं तत्र अतिव्याप्ति त० साध्येति। एवमपि प्रतिज्ञाया अवसरे साध्यं संदिग्ध
मस्ति यथा साध्यसंदेहात् साध्याभावेक्ष्या। तथा साध्याभावो ऽपि संदिग्धः। साध्याद्विपरीतः साध्याभावो ऽप्यस्ति तत्रातिव्याप्तिः तदर्थं निश्चितेति एवमपि अनित्यः शब्दः इत्य
स्मान्निश्चितः साध्याद्विपरीतं नित्यमाकाशमतद्व्यतिरिक्तः त० प्रत्यक्षादिप्रमाणेनेति यद्यपि आकाशादिप्रत्यक्षादिप्रमाणेन निश्चितसाध्यत्वमस्ति तथापि एकेन
प्रत्यक्षेण प्रमाणेन निश्चितसाध्यत्वं नास्ति अशब्दनित्यत्वं अन्येन प्रत्यक्षप्रमाणेन निश्चितसाध्यं आकाशो नित्यः अन्येन प्रत्यक्षप्रमाणेन निश्चितसाध्यमिति नाति

॥ पक्षविपक्षमात्रस्पर्शित्वं विरुद्धत्वं ३। पक्षत्रयवृत्तित्वमनैकान्तिकत्वं ४। साध्यतदभावसाधकत्वं संदिग्धत्वं ५॥ प्रत्यक्षप्रमाणनिश्चितसाध्यविपरीतत्वं कालात्ययापदिष्टत्वं ६। अनिष्टप्रसंजनं तर्कः ७। उत्पत्त्यनाभावयोः प्रत्यभावबद्धनं प्रसंजनं ८॥ निद्रादुष्टान्तःकरणजं ज्ञानं स्वप्नः॥ ९॥

तिव्याप्तिः सर्वतर्कस्वप्नासंशयविपर्ययो एवेत्युक्ते तत्र तर्के लक्षयति। अनिष्टप्रापकं धूमवदभावः। तस्य तस्य प्रसंजनं स्वीकारार्हता धोरणं मात्रं तर्कः व्यतिरेक
व्याप्त्या व्याप्यं वह्निमदभावः व्यापकं धूमवदभावः प्रतिवादी न वह्निमत्त्वं मनुते साधनं मन्यते तत्र वह्न्यभावेन धूमाभावः मपि परोक्षं स्वीकार्यते प्रतिवादी परोक्ष
स्य प्रसंजनेन प्रत्यक्षः स्य प्रसंजनं तर्कः इत्युक्ते यदि वह्निः स्यात् तर्हि धूमो ऽपि स्यात्। धूमप्रत्यक्षे प्रतीयते तस्य प्रसंगो न घटते। यत्र प्रत्यक्षप्रतीतस्य प्रसंजनं नो स
प्रसिद्धत्वं। मूलता लक्षणतर्कस्तासत् तत्र अव्याप्तिः तदर्थं व्यापकप्रसंजनं। धूमे साध्यता। एवं अपि यदि धूमस्तर्हि वह्निः स्यादिति तर्कः स्यात् सति तदर्थं अनिष्टेति उ
प्रसंजनं लक्षयति उत्पत्त्यभावस्थलांतरे वह्निभावे धूमाभावो दृश्यते। पर्वते यदि वह्न्यभावः प्रतिपत्ता तर्हि धूमाभावो ऽपि प्रतिपत्तव्यः। इति उत्पत्त्यनाव्याप्यव्यापकस्य
व्ययो। प्रतिक्षणं अभावबद्धनं प्रसंजनं। इत्युक्ते घटवदाप्रतिपत्तिसमीते। अन्यत्रातिव्याप्तिः त० उत्पत्त्येनेति। तर्हि घटाभावे पटाभावः न उत्पत्त्येति ८। स्वप्नं लक्षयति
अंतःकरणजं ज्ञानमित्युक्ते सुखज्ञाने अतिव्याप्तिः त० दुष्टेति। पुनरपि विकल्पादिकारणादीनामवस्थानं ऽपि दुःखं मनुते। अर्थलाभेन तस्यांतःकरणं रागदुष्टं

तत्व्याप्तिः तदर्थं निद्रेति। ९। निद्रां लक्षयति। अवस्थानमिति इत्युक्ते ईश्वरे चक्षुराद्यधिष्ठानानामवस्थानं तत्र अतिव्याप्तिः त० प्रदेशेति पदं इत्युक्ते गोरक्षसंयोगे अव्याप्तिः तत्रातिव्याप्तिः त० निरिंद्रियेति एव
मपि ग्रहके त्वनिद्राप्रविष्टे ऽपि। त० मनस इति तदर्थं एवमपि मुक्तावस्थायां मतितस्येति। २०। सर्वेषां विकल्पकनिर्विकल्पकयोः प्रमायाः अप्रमायां यदा इत्युक्ते तत्र निर्विकल्पकत्वं ल
क्षयति। ग्रहणं निर्विकल्पकं इत्युक्ते शुक्तिरजतसंसर्गग्रहणे ऽतिव्याप्तिः त० वस्तुग्रहणं इति। एवमपि गुणग्रहणे सविकल्पके अतिव्याप्तिः त० वस्तुस्वरूपग्रहणं एवमपि सविकल्पके ऽतिव्याप्तिः
तदर्थं मात्रेति। २१। २२। सर्वेषां प्रत्यक्षज्ञानं ज्ञानोपादानोपेक्षा उपमानमपि प्रमाया अप्रमायां चेत् सर्वे इत्युक्ते तेषु प्रत्यक्षज्ञानलक्षणमाह। वस्तुग्रहणं प्रत्यक्षज्ञानमित्युक्ते
ऽप्रमत्यक्षज्ञाने ऽतिव्याप्तिः त० अतीतावच्छिन्नेति पदं। २३। ज्ञानं लक्षयति। ज्ञानं हीनमित्युक्ते दुःखानुसवे अतिव्याप्तिः त० दुःखानुसवस्य हीनमस्ति। अनुसूयमानत्वात्। यदनु
सूयते तस्य ज्ञानं कर्तुं न शक्यं। अतः तदर्थं साधनेति पदं। साधने ज्ञानं हानमित्युक्ते उपादाने ऽतिव्याप्तिः त० दुःखेति पदं। २४। ज्ञानमुपादानमित्युक्ते सुखज्ञाने ऽतिव्याप्तिः त० साधनेति
एवमपि ज्ञाने ऽतिव्याप्तिः त० सुखेति। २५। ज्ञानमुपेक्षेत्युक्ते हानोपादानयोरतिव्याप्तिः त० असाधनेति एवमपि सुखसाधनज्ञाने दुःखसाधनं अज्ञानं ज्ञानं सवति दुःखसाधनत्वज्ञानं सु
खसाधनज्ञानं उपादानं सवतीति परस्परमिति तदर्थं उभयेति। २६। अनालिंगितेत्युभयकोटीयेन च अनालिंगितो उभयकोटिः ज्ञानमनध्यवसायः इत्युक्ते संशयज्ञाने ऽतिव्याप्तिः त०
अनवधारणमिति। अनवधारणं ज्ञानमनध्यवसाय इत्युक्ते संशये ऽतिव्याप्तिः त० अनालिंगितेति। २७। सर्वसुखं सांसारिकं स्वर्गमित्युक्ते तल्लक्षयति। सुखं सांसारिकं इत्युक्ते सु

॥ योगजधर्मानुगृहीतस्य मनसो निरिन्द्रियप्रदेशावस्थानं निद्रा २०। वस्तुस्वरूपमात्रग्रहणं निर्विकल्पकं २१ विशिष्टग्रहणं सविकल्पकं २२। अतीतावस्थावच्छिन्नवस्तुग्रहणं प्रत्यक्षज्ञानं २३। दुःखसाधनज्ञानं हानं २४। सुखसाधनज्ञानमुपादानं २५। उभयसाधनत्वज्ञानमुपेक्षा २६। अनालिंगितोभयकोट्यनवधारणं ज्ञानमनध्यवसायः २७। यत्नोत्पाद्यं साधनाधीनं सुखं सांसारिकं २८। इच्छामात्रसाधनसाध्यं सुखं स्वर्गसुखं २९। सांसिद्धिकं तेजःसंयोगानुत्पाद्यं ३०। तेजःसंयोगोत्पाद्यं नैमित्तिकं ३१। कर्मजः संस्कारो वेगः ३२। ज्ञानजः संस्कारो भावना ३३। क्षुद्रुत्पादकः संस्कारः स्थितिस्थापकः ३४। अव्यापकत्वं स्वाभावसादेश्यं ३५। तदभावो व्यापकत्वं ३६। व्यवहितत्वं धर्मोत्पादकं

॥ सुखं स्वर्गसुखमिति व्याप्तिः। त०। साधनाधीनमिति। एवमपि स्वर्गसुखे ऽतिव्याप्तिः तदर्थं प्रयत्नोत्पाद्यमिति। स्वर्गसुखं प्रयत्नं विनैव इच्छया सवति। २८ सर्वत्र सांसारिकसुखे ति
त० इच्छादीनपरानि स्वर्गसुखं केवलमिच्छयोत्पाद्यते सांसारिकं सर्वमिति। ततः प्रयत्नेन। २९। द्रवत्वकं सांसिद्धिकं नैमित्तिकं चोक्तं तल्लक्षयति। ३० ३१ ३२। संस्कारो वेगो भाव
ना स्थितिस्थापकश्चेति त्रिभेदः संस्कारं लक्षयति। ३३। संस्कारो भावनेत्युक्ते वेगस्थितिस्थापकयोरतिव्याप्तिः त० ज्ञानज इति पदं। ३३। ३४। सर्वसंयोगद्वयो अव्यापकात्वं त
ल्लक्षयति। स्वस्य अभावेन सह समानदेशत्वं स्वाभावदेश्यं। अथवा यत्राश्रये संयोगो स्थितस्तत्राश्रये संयोगाभावो ऽप्यस्ति। आश्रयैकदेशे संयोगः आश्रयैकदेशे संयोगाभावः
इति समानदेशत्वं। अव्यापकमित्युक्ते इच्छादीनां ईश्वरे समानदेशत्वाति त० अभावेति। न हि तेषां तत्रैवाभावः। अभावसादेश्यमव्यापकत्वमित्युक्ते ईश्वरेच्छादीनां
नो ऽप्यस्ति॥

॥सुक्तिसादेन सहतेषां रजतादीनां सादृश्यमस्ति। तत्राति० त० त्वेतिपदं॥२५॥२६॥ इष्टार्थे विहितप्रतिषिद्धोदासीनानित्युक्तं तल्लक्षयति। उत्पादकत्वमित्युक्ते निषिद्धे वेति त० धर्मेति॥२७॥२८॥ विपरीत
त्वमुदासीनत्वमित्युक्ते निषिद्धत्वापेक्षया विहितत्वं विपरीतत्वं। विहितत्वापेक्षया निषिद्धत्वं विपरीतत्वमित्युक्ते तत्रा०ति० त० उक्तयेतिपदं॥२९॥ सर्वसामान्यं जातिरूपमुपाधिरूपं चेत्युक्तं
तल्लक्षयति। सामान्यं जातिरित्युक्ते उपाधिकसामान्येति० त० निरवधिकमिति। निरवधिकत्वं जातिरित्युक्ते घटेति० त० सामान्यमिति घटितासमवाये घटे नवाधः॥३०॥ सामान्यमुपाधि
रित्युक्ते गोत्वेति० त० सबाधकमिति। सबाधकमुपाधिरित्युक्ते शुक्तिरजतसंसर्गेति० त० सामान्यमिति॥३१॥ वायुक्तो अंधकारोऽभाव। इत्यंधकारं लक्षयति। आरोपितनीलरूपं य
स्मिन् अभावे स तथा॥ अभावोऽन्धकार इत्युक्ते। घटप्रागभावेति० त० नीलरूप इति। एवमपि अभावः संभवः। रूपाभावात्। तदर्थं आरोपितेति। आरोपितनीलरूपो अंधकार इत्यु
क्ते नीलिमा कालोऽयं इत्याकारो विनीलमारोप्यते। तत्राति० त० अभाव इति॥३२॥ ज्ञानज्ञेयसंबंधो ज्ञाततां लक्षयति। ज्ञानसंबंधो ज्ञातता इत्युक्ते आत्मनो ज्ञानेन सह आश्रयाश्र
यत्वसंबंधः। इन्द्रियज्ञानयोः जन्यजनकत्वाख्यः संबंधः तत्र संबंधयो ज्ञातता स्यात्। तद्धा० ज्ञानविषयत्वं विषयविषयिभावसंबंधः ज्ञातता नाथ्यमाश्रयता वो अन्यं जनकता
वा। केचित् ज्ञाततां ज्ञानफलं ज्ञानसंबंधमतिरिक्तं मन्यंते। तन्मतेन सायां अतिरिक्तं वस्तु फलप्रकाश्यं परोक्षफलं प्रहृत्तिः॥३३॥ तद्वत्तानेन तद्वज्ज्ञानस्येत्यर्थ

त्वं॥२७॥ निषिद्धत्वमधर्मोत्पादकत्वं॥२८॥ उक्तयविपरीतधर्मवत्त्वमुदासीनत्वं॥२९॥ निरवधिकं सामान्यं जातिः॥३०॥ सबाधकं सामान्यमुपाधिः॥३१॥ आरोपि
तनीलरूपो अभावोऽन्धकारः॥३२॥ ज्ञानसंबंधः ज्ञानविषयत्वं॥३३॥ तद्वत्तानेन नियमेनावच्छेद्यत्वं प्रमेयत्वं॥३४॥ गुणेषु संख्याव्यवहारः
संख्याप्रत्यासत्यनिबंधनः। अत एव प्रत्यासत्यनिबंधनत्वं॥३५॥ कार्योत्पादकत्वं कारणत्वं॥३६॥ स्वसमवेतकार्योत्पादकत्वं समवायिकार
णत्वं॥३७॥ समवायिकारणप्रत्यासन्नं अवधृतसामर्थ्यमसमवायिकारणं॥३८॥ उक्तयविपरीतकारणं निमित्तकारणं॥३९॥

॥अवच्छेदकत्वविशेषकृत्। अवच्छेद्यत्वं प्रमेयत्वमित्युक्ते रूपं इत्यस्यावच्छेदकं विशेषणत्वकं भवति। तत्राति० त० ज्ञानस्येतिपदं। एवमपि शुक्तौ रजततां शेषेति। ज्ञानस्यावच्छेद
कः। तत्राति० त० तद्वेति। एवमपि तद्वत्ज्ञाने वा ति ज्ञानेन शुक्त्यादमेरावच्छेदकः। तत्राति० त० तद्वज्ज्ञानेनेति नियमेन ज्ञानेनावच्छेद्यत्वं। अवच्छेद्यत्वं प्रमेयमित्युक्ते नावच्छे
द्यत्वमिति। सोऽकांक्षे। तद्धा० ज्ञानेनेति। अवच्छेद्यत्वं प्रमेयत्वमित्युक्ते विपर्यायाप्ति मतः शुक्तिरजतमवच्छेदीय कास्येन भवति। त० तद्वज्ज्ञानेनेति। एवमपि त्रिशरीरे अतिव्याप्तिः। त०
अणुत्वगुरुत्वादेस्तत्पदे ज्ञानत्वमाविशति० नियमेनेति। अवच्छेद्यपदेन प्रमेयमुच्यते। ज्ञानविषयत्वमुक्तं अत्रैव परइदं प्रसंगतत्वं लक्षयति। तद्वज्ज्ञानेनेति॥३४॥ सर्वसंख्या
या गुणत्वमनेन सा विः। सिद्धिवत् इति तन्न घटते। संख्याया षट्सु पदार्थेषु नांगीकारात्। संख्या द्रव्य एक समवाय पदार्थः। इत्याशंक्य गुणेष्वनेन तत्साविः माह। द्रव्ये गुणा कर्मसु संख्यावर्त्ति
तत्र गुणकर्मणि संख्याव्यवहारः। संख्या या सदृशः गुणकर्मणि प्रत्यासत्तिनिबंधनः। गुणादिषु संख्याव्यवहारः संख्याप्रत्यासत्तिनिबंधनत्वं न उपाधिः॥ अथवा गुणादिषु
संख्याव्यवहारः। संख्या कार्यः समवायनिबंधनः संख्यासमवायिनिबंधनः। यथा गौराः तरवो सामीप्यात् गंगा सदृश्यते वर्त्तते। लक्षणया॥ एवं संख्या गुणयोरक्त। भिन्न
वी। द्रव्ये समवेतत्वात् द्रव्यगता संख्या गुणेषु। संख्यासमवायो नास्ति यस्मात् गुणादिषु संख्याव्यवहारः। प्रत्यासत्यनिबंधनः। न संख्यासमवायिनिबंधनः। गुणेषु॥ अ

९

॥गुणो गुणानाश्रयात् अनवस्थापाताच्च। अत एव गुणादिषु संख्याव्यवहारस्य संख्याप्रत्यासत्तिनिबंधनत्वं। न संख्यासमवायिनिबंधनत्वं॥३५॥ सर्वनित्यानां कारणत्वमुक्तं तल्लक्षयति
कार्योत्पत्तिं प्रति प्रयोजकत्वाधार। कर्तृत्वं कार्योत्पादकत्वं तत्र द्वारत्वं समवायिकारणं असमवायिकारणं निमित्तकारणत्वेत्युक्तं। तन्न लक्षयति। स्वसमवेतेति। कार्योत्पा
दकत्वं समवायिकारणत्वं इत्युक्ते घटं मात्तावस्योत्पादको मुद्गरादिर्निमित्तकारणं। तत्राति० समवेतेति। एवमपि रूपे ति० कथं रूपसमवेतमेवः। रूपांतरमुत्पाद
यति। तद्धा० स्वेतिपदं॥३७॥ समवायिकारणेन सह समवायसंबंधेन। संबद्धं प्रत्यासन्नमित्यर्थः। प्रत्यासत्तिर्नाम समवायः। सा च द्विविधा। कार्यैकार्थप्रत्यासत्तिः
कारणैकार्थप्रत्यासत्तिः॥ अवधृतं निश्चितं सामर्थ्यं यस्य कार्यं प्रति तस्य। अनन्यथासिद्धान्वयव्यतिरेकवदित्यर्थः। अवधृतसामर्थ्यमित्युक्ते चक्रचीवरकला
लादिवतिव्याप्तिः। तत्र समवायिकारणप्रत्यासन्नं। चक्रादीनां घटेन सह समवायिसंबंधेन। संबद्धत्वं नास्ति एवं कृतात्। समवायिकारणप्रत्यासन्नमित्यु
क्ते आत्मनि परमाणौ ज्ञानेन समवायिसंबंधेन संबद्धमस्ति। तत्राति० त० अवधृतसामर्थ्यं आत्मपरिमाणं आत्मनो ज्ञानं न जनयति। विपरीतकारणं अवधृत
सामर्थ्यः मात्रमित्यर्थः निमित्तकारणे निमित्तकारणमित्युक्ते समवायिकारणे असमवायिकारणे वाति० त० उक्तयविपरीतेतिपदं॥३९॥ योगोयुक्तं द्वि

॥इयत्तावच्छिन्नपरिमाणयोगित्वं मूर्त्तत्वं॥४०॥ तदभावो अमूर्त्तत्वं॥४१॥ कार्ययोगावच्छिन्ना सामग्री॥४२॥ संज्ञामात्रेण पदार्थानामभि
धानमुद्देशः॥४३॥ रूप१ रस२ गंध३ स्पर्श४ संख्या५ परिमाण६ पृथक्त्व७ संयोग८ विभाग९ परत्व१० अपरत्व११ गुरुत्व१२ द्रवत्व१३ संस्का
राः पृथ्वीसमवेताः॥४४॥ रूपरसस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहसंस्कारा अप्सु समवेताः॥४५॥
रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारास्तेजसः समवेताः॥४६॥ स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वाप
रत्वसंस्कारा वायुसमवेताः॥४७॥ संख्यापरिमाणपृथक्त्वसंयोगविभागशब्दा आकाशसमवेताः॥४८॥ संख्यापरिमाणपृथक्त्वसंयोगविभागाः कालदिक्समवेताः।
॥४९॥

कदेशीमित्युक्ते घटपटयोः संयोगसंबंधेन युक्तत्वमस्ति। तत्राति० त० परमाणुयोगेति० एवमपि समवायिसंबंधेनाकाशपरिमाणयोगोऽस्ति तत्राति० त० अवच्छिन्नमिति। एव
मपि महत्त्वावच्छिन्नपरिमाणयोगोऽस्ति आकाशे। तत्राति० त० इयत्तेति॥४०॥ अभावो मूर्त्तत्वमित्युक्ते। महत्त्वावच्छिन्नपरिमाणयोगाभावो घटे अस्ति। तत्राति० त० इयत्ता
वच्छिन्नपरिमाणयोगाभावः॥४१॥ कार्यतामहयोगावच्छेदवती सामग्री॥ यत्र सामग्री तत्र कार्यमुत्पद्यत एव। अन्ये राववच्छिन्ना सामग्री इत्युक्ते आकाशपरि
माणयोरयोगव्यवच्छेदः एवास्तीत्यति० त० कार्येति उत्तया [illegible] ज्ञानकार्ययोगव्यवच्छेदकत्वात्॥४२॥ अतिव्याप्ते [illegible] उद्देशमित्युक्ते खलु पुष्पमित्यादाव
तिव्याप्तिः। तद्धा० पदार्थानामिति एवमपि प्रमाणलक्षणोत्पत्तीपदार्थानामभिधानेऽतिव्याप्तिः। तद्धाऽस्पंदसंज्ञ येति। एवमपि संज्ञया प्रमाणलक्षणेन प
दार्थानामभिधानेऽतिव्याप्तिः तद्धा० संज्ञामात्रेणेतिपदं॥४३॥

॥ कार्यरूपेण नष्टेन कारणस्य तन्नष्टो विनाश्यो। अंत्यशब्दस्तेन नाशयति इति विरोधिगुणात्। ५९ सामग्र्यकारणं जनयति प्रागभावं नाशयति। स एव यदि कार्यं
प्रागभावं नाशयति। तर्हि कार्यप्रागभावयोरेकत्र स्थितिः स्यात्। असत्त्वेऽपि कार्यं यदि प्रागभावः तर्हि कथं नाशः। ६१। अन्योन्याभावो घटविनाशे निस्पति

॥ संख्यापरिमाणपृथक्त्वसंयोगविभागबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावना आत्मसमवेताः ॥ ५० संख्यापरिमाणपृ
थक्त्वसंयोगविभागपरत्वापरत्वसंस्कारा मनःसमवेताः। ५१। कर्म मूर्तद्रव्यसमवेतमनित्यमेव। ५२। सामान्यं द्रव्यगुण
कर्मसमवेतं। ५३। विशेषा नित्यद्रव्यसमवेताः। ५४। समवायाभावावसमवेतावेव। ५५। द्रव्यं तु कार्यरूपं स्वावयव
समवेतं। ५६। अकार्यद्रव्यमसमवेतमेव। ५७। विनाशस्तु द्रव्यस्यासमवाय्यसमवायकारणनाशाभ्यां। ५८। गुणस्य
समवाय्यसमवायिकारणनिमित्तकारणविनाशविरोधिगुणाभ्यां विनाशः। ५९। कर्मणः समवायिकारण
विनाशोत्तरसंयोगाभ्यां विनाशः। ६०। प्रागभावस्य प्रतियोगिजनकत्वादिकसामग्रीतः। ६१। अन्योन्याभावस्य प्र
तियोगिविनाशकारणात्। ६२। उत्पत्तिस्तु द्रव्यगुणकर्मणां समवाय्यसमवायिनिमित्तकारणेभ्यः। ६३। तत्र सम
वायिकारणं द्रव्याणां द्रव्यमेव। ६४। असमवायिकारणं द्रव्यकर्मणोः संयोग एव। ६६। गुणस्य तु असमवायि
कारणं क्वचित्समानजातीयः क्वचिदसमानजातीयं गुणान्तरं क्वचित्कर्म। ६७। निमित्तकारणं सर्वेषामेव दृष्टे

॥ यतो नष्टे अपि पटे अन्योन्याभावस्तिष्ठेत्। पश्चान्नास्य कारणं नश्यति अन्यथा घटनाशस्य अन्योन्याभावस्य एकत्र स्थितिः स्यात्। आश्र
याभावात्तु कथं तिष्ठेत्। षष्ठे से निमित्ते गुणः अन्योन्याभावे च द्रव्यादिनिमित्तं ॥ ६२॥ श्रीः॥ \\ श्रीः\\ श्रीः॥\\ ब\\

डाक्टर भाऊदाजी इत्यस्य स्मारकम्
DR BHAU DAJI
MEMORIAL

॥२९

विशेषणविशेष्यभावात् वैशिष्ट्यं पृथक् मन्यते। तत्राह वैशिष्ट्यमनन्यव्यावृत्तिनिष्ठस्य धर्मः। ७० व्यावर्तकं विशेषणमित्यर्थे उपलक्षणे तिष्ठतः समानाधिक
रणमिति समानाधिकरणं विशेषणमित्यर्थे विशेषणेति अव्यावर्तकमिति पदं। ७१। पदवाच्यत्वं समानाधिकरणत्वं इत्यर्थे देवदत्तमानयेत्यत्र तिष्ठतः ए
कवित्तीति एकवित्तिं तत्पदवाच्यमित्यर्थे घटः कुंभ इत्यत्र तिष्ठतः अपर्यायशब्दे इति पदं। ७२। अवच्छेदकं व्यावर्तकं अवच्छेदकमुपलक्षणमित्यर्थे वि
शेषणे तिष्ठतः व्यधिकरणमिति भिन्नाधिकरणमुपलक्षणमित्यर्थे गोः स्वः पुरुषः इत्यत्र तिष्ठतः अनवच्छेदकमित्यर्थः। ७३। पदवाच्यत्वं वैयधिकरण्यमित्यर्थे स
मानाधिकरणत्वे प्रतिष्ठतः भिन्नवित्तीति पदं। ननु शब्दवाच्यार्थः शब्दस्याधिकरणमस्तीति शब्दस्य वाधिकरणं। आकाशस्कंधे घटते।
॥ ततः सक्ष्म्याधिकरणमर्थः। कथं स्यात् तत्राह। ७४। अतीति शब्दस्य अन्यासहवाच्यवाचकसंबंधो अस्ति। सा च जातिरूपव्यक्तौ अत्यासक्त्याश्रिता स्थिता ततश्च जा
तेराश्रयो अर्थः। तां च जातिं शब्दाभ्यां क्रियात्मत्यर्थमधाराशब्दस्यार्थो अधिकरणं जात्वधिकरणत्वात्। अर्थः शब्दस्याधिकरणं अधिकरणत्वमर्थस्य प्रत्या

श्वरादि। ६८। अन्योन्याभावप्रध्वंसाभावयोस्तु निमित्तादेव केवलादुत्पत्तिरिति। ६९। अपरं सकलशास्त्रसुबोधमिति २९ एवं वैशि
ष्ट्यमनन्यव्यावृत्तिः ७० समानाधिकरणं व्यावर्तकं विशेषणं। ७१। एकवित्तिं तत्पदवाच्यत्वं समानाधिकरणत्वं। व्यधिकरणमव
च्छेदकमुपलक्षणं। ७३। भिन्नवित्तिं तत्पदवाच्यत्वं वैयधिकरण्यं। इहेति प्रत्यासत्तिरधिकरणत्वं। ७४ समस्तमूर्तसं
योगित्वं विभुत्वं। ७५ विद्यमानयोः संबन्धो युतसिद्धिः। ७६। अविद्यमानयोराधाराधेयसंबंधो अयुतसिद्धिः। ७७ अस्पन्दयोर्निः
श्रेयससाधनात्मकं शास्त्रमिति। ७८। सप्तपदार्थी पाधरा यावद्यावत्ससधराधरास्तावत्सप्तपदार्थीयं मस्तु व

। स्तुष्ठ कारानीः।
इति श्री शैवाचार्य
श्री शिवादित्यमि
श्र विरचितेयं सप्त
पदार्थी॥ श्रीः\\ व
श्रीः\\ व:\\ श्री\\

सत्तिः समवायसत्तासत्तिरधिकरणत्वमित्यर्थे आकाशपरिमाणं समवायिसंबंधेन प्रत्यासन्नमाकाशे तत्राति तिष्ठतः तातीति ७४। संयोगित्वं विभुत्वमित्यर्थे आ
काशसंयोगनिषेधे इति तिष्ठतः मूर्तैर्निःसह संयोगित्वमिति। एवमपि घटपटसंयोगे तिष्ठतः समस्तेति पदं। एवमपि क्रमेण समस्तमूर्तैः संयोगिनि द्रव्ये तिष्ठतः
गुणपदितिज्ञेयी। ७५। ७६। संबन्धो अयुतसिद्धिरित्यर्थे पक्षीवरकलानां घटे न सहकार्यकारणसंबंधो अस्ति तत्र पृथक्सिद्धः तत्राति तिष्ठतः आधारा
धेयइति एनमपि कुंडबदरयोरतिष्ठतः अविद्यमानयोरिति। एको विद्यते अपरो विद्यमानस्तयोः संबंधः अस्पन्दयोः निःश्रेयससाधना अनिषय
कं शास्त्रं अनिश्चयकं शास्त्रमित्यर्थे तिष्ठतः साधनानिर्धारयकमिति एतदपि कुशास्त्रे तिष्ठतः ७८ अभ्युदयनिःश्रेयससाधि ति। ७७॥७८ मंगला
दीनि मंगलमध्यानि मंगलान्तानि शास्त्राणि प्रथन्ते आयुष्मत्पुरुषाणि भवन्ति अतो अंते मंगलाचरणमाचरति सप्तपदार्थीति। यावदीयं सप्तपदार्थी धराविशेष
यावत्सप्त

॥ धरामि वादयो विश्वे
शैता वत्कालमायं स
सपदार्थी वस्तुपक्ष
शानी अस्तु॥ इति स
सपदार्थी टीका संपू
र्णा:। श्रीः\\ श्रीः\\

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017